Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## ॥ अथ चरणव्यूहव्याख्या प्रारम्भः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च॰भा॰ १ श्रीगणेशायनमः॥ अथातश्चरणव्यूहंव्याख्यास्यामस्तत्रयदुक्तंचातुर्वैद्यं चत्वारोवेदाविज्ञाताभवन्ति त
त्रऋग्वेदोयजुर्वेदः सामवेदोथर्ववेदश्चेति तत्रऋग्वेदस्याष्टभेदाभवन्ति चर्चाश्रावकश्चर्चकःश्रवणीय
पारःक्रमपारः क्रमपदःक्रमजटःक्रमदण्डश्चेति चतुष्पारायणमेतेषां शाखाःपञ्चभवंति आश्वलाय
नी शाङ्खायनी शाकला बाष्कला माण्डूकाश्चेति तेषामध्ययन मध्यायाश्चतुःषष्टिर्मण्डलानिदशैव
तु॥वर्गाणांपरिसङ्ख्यानंद्वेसहस्रेषडुत्तरे॥२००६ सहस्रमेकंसूक्तानां ——— निर्विशंकंविकल्पितम्॥द
शसप्तसुपठ्यन्ते सङ्ख्यातंवैपदक्रमम्॥एकशतसहस्रंवाद्वित्रिपञ्चाशत्सहस्रार्धमेतानि चतुर्दशवा
सिष्ठानामितरेषांपञ्चाशीतिः क्रमकालेतुवेष्टव्यं चतुस्त्रिंशत्सहस्राणितु द्विखण्डानांसहस्राणां द्वात्रिंश
त्षोडशोत्तरा॥चत्वारिंशत्सहस्राणि द्वात्रिंशतञ्चाक्षरसहस्राणि
——— ऋचान्दशसहस्राणि ऋचांपञ्चशतानिच॥ १०५८०॥ऋचामशीतिपादश्चैतत्पारायणमुच्यते
॥एकर्चएकवर्गश्चएकश्चनवकस्तथा॥द्वौवर्गौतुद्वचौज्ञेयौ ऋकूत्रयस्यशतंस्मृतम्॥१००० चतुर्ऋचांपञ्चस राम:
प्तमधिकञ्चशतंतथा॥१७५ पञ्चर्चं५चद्विशद्युक्तंसहस्रंरुद्रसंयुतम्॥१२११० पञ्चचत्वार्यधिकंतुषड्ऋचा १

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ञ्चशतत्रयम्॥३४५॥ सप्तर्चं स्यशतं ज्ञेयं विंशतिश्चाधिकास्मृता॥१२०॥ अष्टऋचान्नुपञ्चाशत्संख्याधिकं तथैवच
॥५५॥ दशाधिकद्विसहस्रपञ्चशाखासुनिश्चिता॥ वर्गाः सञ्ज्ञानसूक्तस्य चत्वारश्चात्रमीलिताः॥ एवंपारायणे प्रो
क्ताऋचासङ्ख्यैनन्यूनतः॥१॥ ॐमित्येकाक्षरं ब्रह्म नादबिन्दुकलात्मकम्॥ त्रिदेवत्वं त्रिमात्रञ्चस्फुरन्तं स
नातनम्॥ तंसर्वत्तं जगत्सेतुं परमात्मानमीश्वरम्॥ वंदेनारायणं देवं निरवद्यं निरञ्जनम्॥ कृष्णद्वैपायनं वन्दे गु
रुं वेदमहानिधिम्॥ येन चरणव्यूहेषु शाखावेदा मिलं कृतम्॥ तच्छिष्यं शौनकगुरुं वेदज्ञं लोकविश्रुतम्॥ नत्वाश्व
शाकलाचार्यं तथैवंच्चाश्वलायनम्॥ एवंपरंपराप्राप्तं बालकृष्णं महागुरुम्॥ यस्यप्रसादाद्व्याख्यामि चरणव्यूह
सञ्ज्ञकम्॥ अथातश्चरणव्यूहं व्याख्यास्यामः॥ अथशब्दो मङ्गले प्रस्तावे च॥ अथशब्दः पूर्वमेवमङ्गलार्थ इत्य
र्थः॥ अतः हेत्वर्थः॥ चरणव्यूहः॥ वेदराशेश्चतुर्विभागात् चरण उच्यते॥ तस्यव्यूहः समुदायः॥ चतुर्वेदानांसमु
दायस्तं व्याख्यास्याम इत्यर्थः॥ कथमेकवेदः॥ तदुक्तमारण्यके॥ सर्वेवेदाः सर्वघोषा एकैवव्याहृतिः प्राण ए
व प्राण ऋच इत्येवं विद्यादिति॥ तस्यचतुर्विभागाः कृताः॥ तथाचोक्तंभागवते दशमस्कंधे षष्ठाध्याये॥ तेनासौ
चतुरोवेदांश्चतुर्भिर्वदनैः प्रभुः॥ सव्याहृतिकान्सोंकारांश्चातुर्होत्रविचक्षणः॥ पुत्रानध्यापयामासब्रह्मर्षीन्

For Private and Personal Use Only

ब्रह्मकोविदान्॥तेतुधर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन्॥तेपरंपरयाप्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः॥चतुर्युगे
ष्वथव्यस्ताद्वापरादौमहर्षिभिः॥क्षीणायुषः क्षीणसत्वान्दुर्मेधान्वीक्ष्यकालतः॥वेदान्ब्रह्मर्षयोव्यस्यान्हृदिस्था
च्युतचोदिताः॥अस्मिन्नप्यन्तरेब्रह्मन्भगवांल्लोकभावनः॥ब्रह्मेशाद्यैर्लोकपालैर्याचितोधर्मगुप्तये॥परा
शरात्सत्यवत्यामंशांशकलयाविभुः॥अवतीर्णोमहाभागवेदंचक्रेचतुर्विधम्॥ऋगथर्वयजुःसाम्नोराशी
नुद्धृत्यवर्गशः॥चतस्रःसंहिताश्चक्रेसूत्रेमणिगणाइव॥मन्त्रैर्मणिगणाइवेतिपाठान्तरम्॥तासांसचतु
रःशिष्यानुपहूयमहामतिः॥एकैकसंहितांब्रह्मन्नेकैकस्मैददौविभुः॥पैलायसंहितामाद्यांबह्वृचाख्यामुवा
चह॥वैशंपायनसंज्ञायनिगदाख्यंयजुर्गणम्॥साम्नांजैमिनयेप्राहतथाछन्दोगसंहिताम्॥अथर्वाङ्गिरसीं
नामस्वशिष्यायसुमन्तवइति॥पैलःस्वसंहितामूचइन्द्रप्रमितयेमुनिः॥बाष्कलायचसोप्याहशिष्येभ्यःसंहि
तांस्वकाम्॥चतुर्धाव्यस्यबोध्याययाज्ञवल्क्यायभार्गव॥पाराशरायाग्नितस्मिन्इन्द्रप्रमितिरात्मवान्॥अ
ध्यापयत्संहितांस्वांमाण्डूकेयमृषिंकविं॥तच्छिष्योदेवमित्रश्चसौभर्यादिभ्यऊचिवान्॥इन्द्रप्रमितिसुतो
माण्डूकेयः॥माण्डूकेयसुतःशाकल्यः॥शाकल्यशिष्योदेवमित्रः॥शाकल्यस्तत्सुतःस्वान्तुपञ्चधाव्यस्यसंहि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताम्॥ वात्स्यमुद्गलशारीरगोखल्यः शिशिरेष्वधात्॥ जातूकर्ण्यश्चवष्कि ष्वसनिरुक्तांस्वसंहिताम्॥ बालायपैं
ग्यवैतालविरजेभ्योददौमुनिः॥ बाष्कलिः प्रतिशाखाभ्योवालखिल्याख्यसंहिताम्॥ चक्रेबालायनिर्भज्य
काशीरश्चैवतांदधुः॥ बह्वृचः संहिताह्येताएतैर्ब्रह्मर्षिभिर्धृताः॥ श्रुत्वैवंछन्दसांव्यासंसर्वपापैः प्रमुच्यतेइ
ति॥ अस्यार्थः॥ व्यासात्पैलः संहितांपदक्रमञ्चत्रिविधरूपंपठित्वाइन्द्रप्रमितयेददौ॥ इन्द्रप्रमितिः चतु
र्धाजटान्तंव्यासंकृत्वाबाष्कलादिभ्यःप्रमित्रेतेषट्शिष्येभ्यः स्वसुत माण्डूकेयाय ददौ॥ शाकल्यः संहिता
पदक्रमजटादण्डरूपंक्षपञ्चधाव्यासंकृत्वावात्स्यमुद्गलशारीरगोखल्यशिशिरेभ्यः ददौ॥ इतिपदेषुसंहिता
त्वंइतिकरणवेष्टनंउदात्तस्वरितस्वराणांसिद्धिः॥ एतच्छन्दसांव्याससविस्तारंश्रुत्वासर्वपापैः प्रमुच्यतइत्यर्थः॥
तथाचविष्णुपुराणे॥ ब्रह्मणाचोदितोव्यासोवेदान्व्यस्तुंप्रचक्रमे॥ अथशिष्यान्सजग्राहचतुरोवेदपारगान्॥ ऋ
ग्वेदश्रावकंपैलंसंजग्राहमहामतिः॥ वैशंपायननामानंयजुर्वेदस्यचाग्रहीत्॥ जैमिनिंसामवेदस्यतथैवाथर्व
वेदवित्॥ सुमन्तुस्तस्यशिष्योभूद्वेदव्यासस्यधीमतः॥ तथाचगृह्यसूत्रम्॥ सुमन्तुजैमिनिवैशंपायनपैलसूत्रभा
ष्यभारतमहाभारतधर्माचार्याइति॥ जानन्तिबाहविदृसारभ्यमाण्डूकेयादंतंमाण्डूकगणसमुदायः॥ गर्गानान्

For Private and Personal Use Only

गै

रु.भा. ऋकौशीत्यारभ्य शांखायनमित्यन्तेन शांखायनगणः॥ एतेषां कौषीतकि —— ब्राह्मणं आरण्यकं च॥ एतरेय दूत्यार
२ भ्य आश्वलायनान्ता आश्वलायनगणे॥ एषां ऐतरेयब्राह्मणं आरण्यक आश्वलायनसूत्रमित्यर्थः॥ ॥ तत्रय दु
क्तं चातुर्वेद्यं चत्वारो वेदा विज्ञाता भवन्ति॥ अस्मिन्ग्रन्थे यदुक्तं चातुर्वेद्यन्तेन चत्वारो वेदा विज्ञाता भवन्ति॥ ऋ
ग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति॥ इति स्पष्टार्थः॥ वेदा हि यज्ञार्थमभिप्रवृत्ताः॥ तथा च विष्णुपुराणम्॥ आ
द्यो वेदश्चतुष्पादः शतसाहस्रसंमितः॥ ततो दशगुणः कृत्स्नो यज्ञोऽयं सर्वकामधुक्॥ अत्रान्तरे मे सुतो व्यास अष्टाविं
शतिमेऽन्तरे॥ वेदमेकं चतुष्पादं चतुर्धा व्यभजत्प्रभुरिति॥ अस्यार्थः॥ आद्यो वेदः वेदविभागात्पूर्वकालीनो वेद
श्चतुष्पादः ऋगादिचतुष्टयसमूहरूपः॥ शतसाहस्रसंमितः॥ दशदशतच्छतं दशशतानि तत्साहस्रं ततः सर्व
मित्यादिश्रुतेः॥ अनन्तसंख्याकः॥ अनन्ता वै वेदा इति श्रुतेः॥ ततो वेदात्प्रवृत्तः कृत्स्नो यं दशगुणः॥ दश
विधः॥ तत्र यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इति श्रुतेः॥ तथा च पञ्च वा एते
महायज्ञा इत्युपक्रम्य॥ ब्रह्मयज्ञो देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञ इति श्रुतेश्च॥ वैतानिका गार्ह्याश्च राम:
दश यज्ञाः॥ अत्रान्तरे वैवस्वतमन्वन्तरे अष्टाविंशतिमे द्वापर इति शेषः॥ मत्सुतो व्यासः कृष्णद्वैपायनश्च तु २

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धात्व्यभजत्॥ ऋग्वेदादिरूपेण चतुर्धा विभक्तवान्॥ पाकयज्ञाः त्रिविधाः अत्र गृह्यम्॥ हुता अग्नौ हूयमाना अन
ग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुता इति॥ अत्र वृत्तिकृत्॥ हुता अग्नौ हुताः अग्नौ हूयमानाः हविष्यस्य जुहुया
दित्येवमादयो हुताः॥ अनग्नौ क्रियमाणाः अष्टवलिहरणमित्येवमादयः प्रहुताः॥ ब्राह्मणभोजनं यत्रास्ति ब्राह्म
णान्भोजयित्वेति ब्रह्मणि हुताः इति॥ नित्याभ्यासो ब्रह्मयज्ञः पारायणञ्च॥ अत्र गृह्यसूत्रम्॥ ब्रह्मयज्ञखण्डे॥ य
दृचोधीते पय आहुतिभिरेव तद्देवतास्तर्पयति यद्यजूंषि घृताहुतिभिर्यत्सामानि मध्वाहुतिभिर्यदथर्वाङ्गिरसः
सोमाहुतिभिर्यद्ब्राह्मणानि कल्पान् गाथा नाराशंसीरितिहासपुराणानीत्यमृताहुतिभिर्यदृचोधीते [illegible] कृत्स्ना
[illegible] पितॄन् स्वधा उपक्षरन्तीति॥ तत्र ऋग्वेदस्याष्टभेदा भवन्ति॥ स्थानानि भवन्तीति पाठान्तरम्॥ शाकल्य बाष्कलौ
ऐतरेय ब्राह्मणारण्यकौ॥ शाङ्खायन माण्डूकौ कौषीतकीय ब्राह्मणारण्यकाविस्यष्टभेदाः॥ अन्यो वे
दाविकृति शाखाश्च भेदस्तु त्रिविधस्तथा॥ पृथक् नानाभिधानेन व्यासेन कथितं पुरा इति॥ अत्राष्टभेदेनाष्टौ स्थाने
न वा विकृतिर्ग्राह्या॥ विकृतिस्तु अन्ते वक्ष्यामः॥ तस्माद्ब्रह्मयज्ञार्थे पारायणार्थे च ऋग्वेदस्याध्ययनं कर्तव्यम्॥ तत
श्चतुष्पदेन वक्ष्याति चर्चाश्रावकश्चर्चकः श्रवणीयपार इति॥ चर्चाध्ययनम्॥ तत्र औणसूत्रे॥ स्विन्ति पृजिकाश्चिकुं भि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चर्वेश्च॥एभ्योअङ्‌ क्रियाभावादौ॥ चिन्तिस्मृत्याम॥ [illegible]तायाम्॥ कथिवाक्यप्रबन्धे॥ कुम्बिआच्छादने॥ चर्चाध्य
यने॥ चुरादयइति॥ अष्टाध्यायसूत्रे॥ ताल्वोष्ठपुटव्यापारेण शब्दस्यश्रवणं क्रियतेसाचर्चा॥ तदध्ययनस्यश्रावको
गुरुः॥ तस्यचर्चकः शिष्यः॥ श्रवणीयपारः श्रवणीयोवेदः तस्यपारः समाप्तिः॥ इतिचतुष्टयेन अध्ययनंसूचितम्॥ अ
ग्रेचतुष्पदेनचत्वारिपारायणानिसूचयति॥ तत्पारायणंद्विविधम्॥ प्रकृतिविकृतिरूपम्॥ काप्रकृतिः काविकृ
तिः॥ प्रकृतिः संहिता॥ साद्विविधा॥ रूढायोग रूढायथा॥ अग्निमीलेपुरोहितमिति॥ योगायथा॥ अग्निमीले॥ ईले
पुरोहितमितिप्रातिशाख्येद्वितीयपटलेभाष्यकारेणव्याख्यातम्॥ अथचतुष्पारायणंयथा॥ क्रमपारः क्रमपदः क्र
मजटः क्रमदण्डश्चेतिचतुष्पारायणम्॥ क्रमशब्दउभयसंहितावाच्यः॥ सकथम्॥ अनुलोमविलोमाभ्यांत्रिवारंहि
पठेक्रमम्॥ विलोमेपदवत्संधिरनुलोमेयथाक्रमम्॥ यथाक्रमंयथासंहितादित्यर्थः॥ अन्यच्च॥ वर्णक्रमः अक्षर
समाम्नायएवेतारण्यके॥ कथमभिष्टयादित्यक्षरशः॥ चतुरक्षरशः॥ पक्षाः॥ अर्धर्चशः॥ ऋक्शः॥ इतिब्राह्म
णम्॥ भूयांसितुसमाम्नानाद्व्यंजनमात्रंतुतत्तस्याभिधानंभवतीतिनैरुक्ताः॥ क्रमः संहितावाचिकथम्॥ पदप्रकृ
तिः संहितादितिनैरुक्तवचनात्॥ साक्रमरूपादित्यर्थः॥ क्रमस्यपदः क्रमः संहितातस्याः पदानि॥ इतिद्वेप्रकृतिपारा



For Private and Personal Use Only

विधा
यणेद्वे विकृतिरूपे॥विकृतिअष्टभवति॥तच्च॥जटामालाशिखालेखाध्वजोदण्डोरथोघनः॥अष्टौविकृतयःप्रोक्ताक्रमपूर्वामहर्षिभिरिति॥आसांमध्येजटादण्डयोः प्राधान्यंम॥तत्कथंम्॥जटानुसारिणीशिखा॥दण्डानुसारिणी माला॥लेखाध्वजोरथश्च॥घनस्तुउभयानुसारित्वात्॥अस्याः नियमवाक्यानिव्यालीकृतजटापटलेउदाहरणानिच॥तत्रजटावाक्यंम॥क्रमेयथोक्ते पदजातमेवद्विरभ्यसेदुनरमेव पूर्वम्॥अभ्यस्य पूर्वञ्चतथोत्तरे पदेवसानमेवंहिजटाभिधीयते॥अस्यार्थः॥क्रमेयथोक्तेसत्तिक्रमोद्वाभ्यामित्यादु———केक्रमप्रकारेपदजातंपदद्वयंवाषदत्रयंवाद्विरभ्यसेत॥द्विवारपठेत्॥अभ्यासप्रकारः॥उत्तरमेवपूर्वम्॥क्रमवत्पदद्वयंगृहीत्वापूर्वनामप्रथमंउत्तरपदमभ्यसेत्॥ततः उत्तरपूर्वपदयोः सन्धानद्वारापूर्वे रद्विरभ्यस्योत्तरपदेअवसानंएवंप्रकारेणअध्ययनंजटाऽभिधीयतेकथ्यते॥हीतिनिश्चयार्थम्॥उदाहरणेनदृश्यते॥अग्निमीलेईलेग्निमग्निमीले॥ईलेपुरोहितंपुरोहितमीलईलेपुरोहितमित्यादिज्ञेयम्॥अथदण्डलक्षणम्॥क्रमव्युत्क्रमविपर्यस्यपुनश्चक्रममुत्तरम्॥अर्धर्चादेवमुक्तोक्तः क्रमदण्डोभिधीयते॥उदाहरणम्॥अग्निमीले ईलेग्निं॥अग्निमीले ईलेपुरोहितम्॥पुरोहितमीलेग्निमित्यादिज्ञेयम्॥अथमालालक्षणम्॥ब्रूयात्क्रमविपर्यासावर्धर्चस्यादितोततः॥अन्तंचादिनयेदेवंक्रममालेतिगीय

च.व्या. ते॥मालामालेवपुष्पाणांपदानांग्रन्थिरीहिता॥आवर्त्तते[illegible]स्यांक्रमव्यु[illegible]क्रमाः॥अथशिखालक्षणम्॥प
५ दोत्तरंजटामेवशिखामार्याः प्रचक्षते॥अथलेखालक्षणम्॥ ॥क्रमाद्द्वित्रिचतुःपञ्चपदक्रममुदाहरेत्॥पृथक्पृथ
क्त्विपर्यस्यलेखामाहुः पुनःक्रमात्॥ ॥अथध्वजलक्षणम्॥ब्रूयादादेःक्रमंसम्यगान्तादुत्तारयेद्यदि॥वर्गोवाऋ
चिवायत्रपठनंसध्वजःस्मृतः॥६॥अथरथलक्षणम्॥पादशोर्धर्चशोवापिसहोक्त्यादण्डवद्रथः॥७॥अथघनलक्ष
णम्॥जटामुक्त्वाविपर्यस्यघनमाहुर्मनीषिणः॥८॥अन्यच्च॥जटाशिखाघनःप्रोक्ताक्रमपूर्वामनीषिभिः॥९॥ ॥
इतिविकृतिलक्षणान्युक्तानिअध्ययने॥संहितापारायणम्॥पदपारायणम्॥जटापारायणम्॥
क्रमदण्डपारायणञ्च॥चतुष्पारायणमित्यर्थः॥एतेषांशाखाः पञ्चभवन्ति॥एतेषांवेदपाराणानांपञ्चशाखाभ
वन्तीत्यर्थः॥ ॥ताःकाः॥आश्वलायनीशांखायनीशाकलाबाष्कलामाण्डूकाश्चेति॥इतिप्रसिद्धाः॥तेषामध्ययन
म॥तेषांआश्वलायनीयादिशाखानांसमानाध्ययनंसूचयति॥अध्यायाःश्चतुषष्ठिः॥अग्निमीले॥अयंदेवायेत्यादि
६४ चतुःषष्ठिरध्यायाइत्यर्थः॥मण्डलानिदशैवतु॥अग्निमीलेकुपुंभकइत्यादिउपाकर्मणिप्रसिद्धानीत्यर्थः॥व रा.भ.
र्गाणांपरिसङ्ख्यातंद्वेसहस्रेषडुत्तरे॥वर्गादिआऋचान्ताःसङ्ख्याबालखिल्यैर्विनाज्ञेया॥षडुत्तरसहस्रद्वयवर्गा ५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यर्थः॥सहस्रमेकंसूक्तानांनिर्विशंकंविकल्पितम्॥दशसप्तसुपठ्यन्ते॥सप्तदशाधिकसहस्रंसूक्तानीत्यर्थः॥स
ङ्ख्यातंवैपदक्रमंएक श तसहस्रंवाद्विपञ्चाशत्सहस्रार्ध मेतानिचतुर्दशवासिष्ठानामितरेषांपञ्चाशीतिः॥
एकलक्षंद्विपञ्चाशत्सहस्रपञ्चशतचतुर्दशवासिष्ठानाम्॥१५२५१४॥वासिष्ठगोत्रीयाणांइन्द्रोतिभिरेकस
प्ततिपदात्मिकोवर्गोनास्ति॥इतरगोत्रीयाणांपञ्चाशीत्यधिकपदानीत्य ॥८५॥अथवालखिल्यसहितापद
सङ्ख्याउच्यते॥लक्षैकंतुत्रिपञ्चाशत्सहस्रंशतसप्तकम्॥पदानिचद्विनवतिः प्रम॰ णंशाकलस्यच॥१॥एक
लक्षत्रिपञ्चाशत्सहस्रसप्तशतद्विनवतिश्चाधिकानिपदानीत्यर्थः॥१५३७९२॥पदानिबालखिल्यस्यअर्कसं
ख्याशतानिच॥अधिकानितुसप्तैव १२०७ वर्गाअष्टादशास्मृताः॥सप्ताधिकद्वादशशतानिपदानीत्यर्थः॥१२०७॥
इत्याश्वलायनानाम्॥शांखायनानांतुवालखिल्यसहितपदसङ्ख्याउच्यते॥शाकल्यदृष्टेपदलक्षमेकंसार्द्धन्तुवे
देत्रिसहस्रयुक्तम्॥शतानिसप्तैवतथाऽधिकानिचत्वारित्रिंशच्चपदानिचर्चा॥शाकल्योमाण्डूकगणस्थः॥संहिता
पदानि॥एकलक्षत्रिपञ्चासत्सहस्रसप्तशतचतुस्त्रिंशदधिकानिपदानीत्यर्थः॥१५३७४३॥पदानिवालखिल्यस्य
रुद्रसङ्ख्याशतानिच॥षट्पञ्चाशताधिकानिवर्गाःसप्तदशास्तथा॥एकादशशतषट्पञ्चाशदधिकवालखिल्ये

For Private and Personal Use Only

च०व्या० पदानीत्यर्थः॥११४४॥अष्टपञ्चाशत्सदात्मिकऋकृत्रयेस्य॥यमृत्विजोवर्गोनास्ति॥नतुहविष्यान्तायसूक्तेहृस
६ मीचीवर्गेत्रिऋचानन्तरंएकऋएवाग्निःऋकृ॥यमृत्विजोऋकृ॥खिलरूपेणपठन्ति॥ज्योतिष्मन्तमृचाभावः॥ऋ
कृत्रयस्यतेषामन्तेपदाभावत्वात्॥अन्तेवर्गसमाप्तौयावन्मात्रमृचंपठन्ति॥एवंहृसमीचीषड्डचोवर्गः॥आश्वला
यनानांचतुर्ऋचात्मकोवर्गः॥इत्याश्वलायनशाखाप्रनशाखयोरध्ययनयोर्भेदइत्यर्थः॥यस्यमन्त्रस्यपदाभावः त
स्यखैलिकत्वंसिद्धम्॥नहिंत्र्यम्बकंयजामहेमन्त्रस्यपदाभावात्तस्यखैलिकत्वंसिद्धम्॥नहिउमानागात्॥उपलेखा
याम्॥त्र्यम्बकंप्रथमंभद्रन्नःप्रजापतेऋतञ्चेतिपदक्रममिमनुमयाभिगीभूमिमितिउमयाअर्धर्चान्तेपदगीतम्॥त
स्मात्पदकालेक्रमकालेचपठन्ति॥क्रमोद्वेपदशद्वतिवचनात्॥अत्रद्वितीयपदंनास्ति॥अर्धर्चान्तसमापनात्॥
क्रमाभावः॥तस्मात्पदकालेक्रमकालेपठनंसएवंपदक्रमइत्यर्थः॥क्रमकालेतुवेष्टनंचतुस्त्रिंशत्सहस्राणि॥
षत्वेणत्वेचदीर्घत्वेआकारेसानुनासिके॥त्रिचतुःपञ्चक्रमेअर्धर्चान्तेचवेष्टयेत्॥क्रमेणउदाहरणानिज्ञातव्या
नि॥ ॥सुषुमायातम्॥मोषुणः॥वाजेषुसासहिर्भव॥आंउपानसः॥न्याविध्यदिलीबिशस्य॥अगादारैगुरूसा॥नि राम:
रुस्वसारमस्कृतोषसम्॥अग्निमीले०ऋत्विजमित्यृत्विजमिति॥चतुस्त्रिंशत्सहस्राणीक्रमकालेतुवेष्टनानीत्यर्थः ६

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्विखण्डानांसहस्राणांद्वात्रिंशत्षोडशोत्तरा॥ षोडशोत्तरद्वात्रिंशत्सहस्राणिद्विखण्डानीत्यर्थः॥ चत्वारिंशतंसहस्राणिद्वात्रिंशतञ्चाक्षरसहस्राणि॥ चतुर्लक्षद्वात्रिंशत्सहस्राक्षराणीत्यर्थः॥ द्वात्रिंशतञ्चाक्षरसहस्राणीत्यर्थसमाप्तेः पुनर्वचनमुक्तम्॥ अथपारायणेऋक्परिमाणमुच्यते॥ ऋचान्दशसहस्राणिऋचांपञ्चशतानिच॥ ऋचामशीतिपादश्चपारायणंप्रकीर्त्तितम्॥ एतत्पारायणंवालखिल्यैर्विनासङ्ख्यातम्॥ वालखिल्यानिपारायणेनसन्ति॥ तदुच्यते॥ ऋग्वेदान्तर्गतवालखिल्यमेकादशसूक्तम॥ ११सूक्तसहस्र१००० सप्तदशाधिक १७॥ मित्यत्रऋचान्दशसहस्राणीत्येतत्सङ्ख्याव्यतिरिक्तानिवालखिल्यानीतिप्रसिद्धिः॥ तत्रयज्ञानुष्ठानेब्राह्मणसूत्रेचश्रूयते॥ वालखिल्याःशंसतिप्राणावैवालखिल्याइति॥ अभिप्रवःसुराधसमितिषड्वालखिल्यानांसूक्तानामितिब्राह्मणेआरण्यके॥ अथवालखिल्याविहरेत्तदुक्तंषोलशिनेतिसूत्रकारः श्रौतस्मार्त्तसर्वकर्मानुष्ठानेवालखिल्यप्रसिद्धिः॥ वेदपारायणेवर्जमित्यर्थः॥ शौनकाचार्यवचनात्॥ यथाप्रैषाध्यायकुन्तापाध्यायनिविदाध्यायसुपर्णाध्यायश्चेतितद्वद्वालखिल्याध्यायइत्यर्थः॥ वालखिल्यसंहितासर्वानुक्रमणीयमन्त्ररूपीऋक्सङ्ख्याउच्यते॥ द्विपञ्चाशदधिकपञ्चशतदशसहस्राणीति॥ १०५५२वालखिल्यव्यतिरिक्तऋक्सङ्ख्यातु॥ द्विसप्त

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यधिकचतुःशतदशसहस्राणीति॥१०४७२॥एतत्सङ्ख्यानित्यद्विपदानैमित्तिकद्विपदासहितं उक्ता॥हवनाध्य
यनाभ्यांसमानासानित्यद्विपदा॥आसांसङ्ख्याउपलेखायाम्॥तच्च॥साधुरसिक्रन्नातिषकुनउरौदेवाविदूषांस्व
यावाजंमद्दिराधआवासुम्नेतेतेदेवायरायस्कामः प्रतिनस्तोमंस्तायुधासःपितुर्नपुत्रःसनोवाजेषुगावोनयूयं
पवस्वसोममन्दयन्नितितिस्रःपरिसुवानोनृभिर्येमानः प्रत्यञ्चमर्कमनयंकृचीभिरितिद्विपदैकपदाद्वावि
शतिस्तासांसप्तदशद्विपदाएकपदाःपञ्चेति॥हवनाध्ययनेविपरीतासानैमित्तिकद्विपदा॥ताःआहवर्गरूपे
ण॥पश्वानतायुंदशरयिर्नदशवनेषुदशश्रीणंदशसुक्रःशुभ्रुकांदशवनेमपूर्वीर्दशाग्नेत्वन्नश्चत्वार्यग्नेभवष
ट्प्रभुकैतुदशराजाराष्ट्रानांदशकईम्मक्तादशबभ्रुरेकोदशपरिप्रधन्वद्शनन्तेसोतारोद्वादशेमानुकंचत्वा
र्याधाहिवनसाचत्वारीतिनैमित्तिकद्विपदाचत्वारिंशोत्तरशतमिति॥हवनेएकैका॥अध्ययनेद्वेद्वे॥आसांअन्या
एका॥उर्वरितासानित्यद्विपदा॥उक्तञ्चपरिभाषायाम्॥विंशिकाद्विपदाविराजस्तदर्धमेकपदाद्विर्द्विपदास्तृचः
समामनन्तिअयुस्त्वंत्याद्विदैवेति॥द्विर्द्विपदास्तृचःसमामनन्ति॥यस्यसूक्तस्यद्विर्द्विपदाःसमामनन्तितास्तृचः राभः
अध्ययनेचतुष्पदाःकृत्वेत्यर्थः॥अयुदचन्त्याद्विपदैव॥सूक्तस्याचौऽयुजोयानभवन्तितास्वन्त्यानित्याद्विपदैव॥ ७

For Private and Personal Use Only

एवंअध्ययनेद्वावर्धर्चत्र्यृगेवप्राधान्यम्॥त्रीण्यर्धर्चायाः कथम्॥तत्रापिद्वावृचावेकात्र्यृचाअर्धर्चाएकाकर्तव्या॥
अध्ययनसंप्रदायबलात्॥अनादेशेअष्टाक्षराः पादाश्चतुष्पदाश्चर्च इतिपरिभाषायाम्॥अध्ययनेत्रीण्यर्धर्चत्र्यृ
गेवसंप्रदायोनास्ति॥आसांपरिमाणमाह॥अग्निंहोतारंपञ्चसहिशर्धोनषलयंजायतपञ्च॥विष्णोविहायास्ति
स्रो यन्त्वंरथंपञ्चप्रतद्वोचेयंषलेन्द्रयाह्युपनः पञ्चेमान्तेचत्वारिसनोनव्येभिर्वर्जमिन्द्रायहिद्यौसप्त॥त्वयावयं
षलवर्मंहएकाप्रसुज्येष्ठंषलूतीदेवानांवर्जम्॥सुषुमायातन्त्रीणिप्रप्रपूणश्चतुष्कमस्तुश्रौषट्चत्वारिशचीभि
र्नोवर्जंवृषंनिद्रपञ्चयेदेवासोवर्जंन्नवत्यंनरयमेकासखेसखायमेकाः यारुचात्रीण्येतास्त्रीणित्रीण्यर्धर्चात्र्यृचाह
वनीयाश्चतुर्नवतिसङ्ख्याइतित्रीण्यर्धर्चत्र्यृकूहवने॥अध्ययनेअर्धर्चद्वयेनत्र्यृगेका॥अर्धर्चेनैकेवत्र्यृक्द्वये
कर्तव्यइत्यर्थः॥एकर्चस्यत्र्यृग्द्वयंविराट्छन्दोविनाकथंभवतीत्याशङ्क्यतत्रोच्यते॥विराट्छन्दः सर्वछन्दसि
व्याप्तंवर्त्तते॥उक्तंचारण्यके॥चत्वारः पुरुषाइतिबाध्वः शरीरपुरुषः छन्दः पुरुषोवेदपुरुषोमहापुरुषइति॥ त
स्योष्णिग्लोमानित्वचङ्गायत्रीत्रिष्टुप्मांसमनुष्टुप्स्नावान्यस्थिजगतीपङ्क्तिर्मज्जाप्राणोबृहतीति॥यान्येतानिविरा
ट्चतुर्थान्येवमुहैवैवंविदुषएतदहः सर्वैः छन्दोभिः प्रतिपन्नंभवतीति॥प्राप्तोभवतीत्यर्थः॥गायत्रीपङ्क्तीश्चत्व

छं॰भा॰ तिषजतिगायत्रीवैपुरुषः पाङ्क्ताः पशवइतिब्राह्मणम्॥अत्रोदाहरणम्॥पवस्वसोममन्दयन्निनितिस्रोनित्यद्वि
८ पदागायत्र्यइतिसर्वानुक्रमणी॥द्विपाद्वैपुरुषोवीर्यंत्रिष्टुप्॥विराड्व्यामनयोर्द्वाविंशमयोर्द्विपदयोरयंपुरुषः॥
अत्रोदाहरणम्॥आवांसुम्नेवरिमन्॥प्रत्यञ्चमर्कमनयन्॥परिसुवानोगिरि॰॥जगतीपादइति॥एवंसर्वव्याप्तो
भवतीत्यर्थः॥छन्दांसिजज्ञिरइतिश्रुतिः॥तथाचशतपथब्राह्मणे॥तदाहुःकिंछन्दाःकादेवताग्ने॰प्रतिष्ठेइति
द्विपदाः छन्दोविष्णुर्देवताप्रतिष्ठेति॥यथाविष्णुःसर्वव्याप्तःतथाविराट्छन्दइत्यर्थः॥विराट्छन्दस्तुचतुष्पदा
॥त्रीण्यर्धर्चायापञ्चपादाऋक्कर्तव्येति॥अत्रकिंप्रमाणंतच्चोच्यते॥एकपाद्भूयोद्विपदोविचक्रमेद्विपात्त्रिपा
दमभ्येतिपश्चात्॥चतुष्पादेतिद्विपदामभिस्वरेसंपश्यन्पङ्क्तीरुपतिष्ठमानः॥एकपदाद्विपदानित्याद्विपात्त्रि
पादमभ्येति॥एकीभूताभवन्तीत्यर्थः॥अस्योदाहरणम्॥अग्निंहोतारंमन्ये॰दसम्॥यऊर्ध्वया॰कृपा॥अग्रेअर्ध
र्चा॥घृतस्यविभ्राष्टिमनुवष्टि॰इतिद्विपदा॥चतुष्पदातु॥पश्वानतायुं॰॥एकार्धर्चात्रिनदाएकार्धर्चाद्विपदा
एकाऋक्पञ्चपदाअध्ययने॥द्विर्द्विपदास्तृचःसमामनन्तीत्यत्रसमपादग्रहणात्असमानपादाविरुद्धातर्हि राम॰
पङ्क्तिछन्दोपञ्चपदाभवतितस्यद्वितीयभेदेविराट्तस्मात्पञ्चपादत्वंप्राप्तम्॥समपादावाअसमपादोविराट् ८

कुंदद्वित्यर्थः॥अत्रश्रुतिः॥समौचिद्धस्तौनसमंविविष्टः संमातराचिन्नसमदुहातइत्यनयाऋचापरिहारः॥दक्षि
णवामहस्तौसमौकर्त्तुंत्वाआसमाप्नाविलर्थः॥अथाध्ययनेऋक्सङ्ख्योच्यते॥षण्णवत्यधिकचतुःशतदश
सहस्राणीति॥१०४९६॥ताःसहितनैमितिकद्विपदाश्चत्वारिंशोत्तरशतसहितदशसहस्राणीति॥१०५९६॥संज्ञा
नमुशनावदत्सूक्तस्यपञ्चदशचैकीकृत्यएवंपारायणेऋक्सङ्ख्या॥१०५८०॥ऋचांदशसहस्राणीतिवचनस्य
सङ्ख्यापूर्णाभवतीत्यर्थः॥एकाउर्वरितासाभद्रन्नोअपिवातयमनःइतिपादाधिक्यमनुक्रमणिकावृत्तावप्यु
क्तं॥भद्रंपुच्छमित्यारण्यके॥अथसञ्ज्ञानसूक्तम्॥ ॥सञ्ज्ञानमुशनावदत्सञ्ज्ञानंवरुणोवदत्॥संज्ञानमिन्द्र
श्चाग्निश्चसञ्ज्ञानंसवितावदत्॥सञ्ज्ञानंनखेभ्यः सञ्ज्ञानमरणेभ्यः॥सञ्ज्ञानमश्विनायुवमिहास्मासुनियच्छताम्
॥यत्कक्षीवांसंवननंपुत्रोअङ्गिरसाभवेत्॥तेननोद्यविश्वेदेवाःसंप्रियांसमजीजनन्॥संवोमनांसिजानतांसमाकू
तिर्मनामसि॥असौयोविमनाजनस्तंसमावर्त्तयामसि॥तत्कंयोरावृणीमहे०॥१॥नैर्हस्त्यंसेनादरणंपरिवर्त्मेतुयद
विः॥तेनाअमित्राणांबाहूहविषाशोषयामसि॥परिवर्त्मान्येषामिन्द्रःपूषाचसस्रुतः॥तेषांवोअग्निदग्धानामग्नि
मूढ्ानामिन्द्रोहन्तुवरंवरम्॥एषुनद्यवृषाजिनंहरिणस्याभियंयथा॥परांअमित्रांऐषत्वर्वाचीगौरुपेजतु॥२॥प्र

च.म्रा.
९
ध्वराणांपतेवसोहोतर्वरेण्यक्रतो॥तुभ्यंगायत्रमृच्यते॥गोकामोअन्नकामःप्रजाकामउतकश्यपः॥भूतंभविष्यत्प्र
स्तौतिमहद्ब्रह्मैकमक्षरंबहुब्रह्मैकमक्षरम्॥यदक्षरंभूतकृतोविश्वेदेवाउपासते॥महर्षिमस्यगोप्तारंजमदग्निम
कुर्वत॥जमदग्निराप्यायतेछन्दोभिश्चतुरुत्तरैः॥राज्ञःसोमस्यभक्षेणब्रह्मणावीर्यावता॥शिवानःप्रदिशोदिशःस
त्यानःप्रदिशोदिशः॥३॥अजोयत्तेजोददृशेशुक्रंज्योतिःपरोगुहा॥तदृषिःकश्यपस्तौतिसत्यंब्रह्मचराचरम्॥ध्रुवं
ब्रह्मचराचरम्॥त्र्यायुषंजमदग्नेःकश्यपस्य त्र्यायुषमगस्त्यस्यत्र्यायुषम्॥यद्देवानांत्र्यायुषंतन्मेअस्तुत्र्यायुषम्॥
तच्छंयोरावृणीमहे०॥४॥इतिसंज्ञानसूक्तंपञ्चदशर्चात्मकम्॥अस्यग्रहणेप्रमाणमाश्वलायनसूत्रम्॥तच्च॥समा
नीवइत्येकातच्छंयोरावृणीमहइत्येकेति॥तथाचशाखायनस्यकौषीतकिसूत्रम्॥तच्च॥अथोपाकर्मौषधीनांप्रा
दुर्भावेहस्तेनश्रवणेनवाअक्षतसक्तूनांधानानान्दधिघृतमिश्राणांप्रत्यृचंवेदेनजुहुयादितिहैकआहुःसूक्तान्
वाकाद्याभिरितिवाऽध्यायार्षपाद्याभिरितिमाण्डूकेयोऽथहस्माकौषीतकिरग्निमीळेपुरोहितमित्येकाकुषुंभकस्त
दब्रवीदावदंस्त्वंशकुनेभद्रमावदगृणानाजमदग्निनाधामन्तेविश्वंभुवनमधिश्रितंगन्तानोयज्ञंयज्ञियाःसुशमियो राम:
नस्तोऽअरणःप्रतिचक्ष्वविचक्ष्वाग्नेयाहिमरुत्सखायत्तेराजंकृतंहविरितिहचास्तच्छंयोरावृणीमहइत्येकाह्नशो ९

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षाद्वविष: प्राश्नंतीति॥पञ्चशाखानांपारायणेतकं योरावृणीमहद्इत्यत्रसमाप्तिरेकवेदत्वात्॥उक्तञ्च॥सांख्या
श्वलायनौचैवमाण्डूकोबाष्कलस्तथा॥बह्वृचोऋषयः सर्वेपञ्चैतेह्येकवादिनइति॥सांख्यानामशांखायनइ
ति॥अथपारायणेवर्गसङ्ख्याउच्यते॥एकर्चेएकवर्गश्चएकर्चेनवकस्तथा॥एकर्चेएकवर्गःजातवेदसइत्यर्थः
नवर्चेएकवर्गः॥आपोहिष्ठेति॥द्वौवर्गौतुद्व्यृचौज्ञेयौ॥द्वौवर्गौद्व्यृचावित्यर्थः॥अग्नेत्वन्नोऽअन्तमः॥आयाहिवनसा
सहेति॥ऋक्त्रयस्यशतंस्मृतम्॥त्र्यृचोवर्गाः शतमित्यर्थः॥उदुत्यञ्चमसंनवमित्यादि॥चतुर्ऋचपञ्चसप्तत्यधिकं
चशतंतथा॥चतुऋचवर्गाः पंचसप्तत्यधिकशतंइत्यर्थः॥१७५॥यदङ्ग·दाशुषेत्वमित्यादि॥पञ्चर्चांतुद्विशतकंस
हस्रंरुद्रसंयुतम्॥पञ्चर्चवर्गाः एकादशाधिकद्वादशशतानीत्यर्थः॥१२११॥अग्निमीलइत्यादि॥पञ्चचत्वार्यधिकं
तुषड्डचान्तुशतत्रयम्॥षड्डचवर्गापञ्चचत्वारिंशत्यधिकशतत्रयइत्यर्थः॥३४५॥अश्विनायज्वरीरिषइत्यादि॥
सप्तऋचांशतंज्ञेयंविंशतिश्चाधिकास्मृता॥सप्तर्चवर्गाः विंशत्यधिकशतइत्यर्थः॥१२०॥यच्चिद्धिसत्यसोमपाइत्या
दि॥अष्टऋचांतुपञ्चाशत्पञ्चाधिकतथैवच॥अष्टर्चवर्गाः पञ्चाधिकपञ्चशतइत्यर्थः॥५५॥इन्द्रंविश्वाअवीवृधनि
त्यादि॥दशाधिकद्विसहस्रम्॥एवंदशाधिकसहस्रद्वयवर्गाइत्यर्थः॥२०१०॥पञ्चशाखासुनिश्चिताः॥पञ्चशाखानां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पारायणे निश्चयेन इत्यर्थः॥ वर्गाः सञ्ज्ञानसूक्तस्य चत्वारश्चाशीतिः॥ सञ्ज्ञानसूक्तस्य चत्वारो वर्गाश्चात्र मिलित्वा
द्विशाधिकसहस्रद्वयमित्यर्थः॥ एवं पारायणे प्रोक्ता ऋचां संख्ये न न्यूनतः॥ एवं पूर्वोक्तप्रकारेण वर्गस्य ऋक्न्यूनसंख्ये
न दशर्चस्य पञ्च ऋक्त्रीण्यर्धर्चस्य ऋक्कर्तव्येत्यर्थः॥ एवं चतुर्विधपारायणेपि ज्ञेयम्॥ समानीव इति शाकलानां
सूक्तं रिति बाष्कलानामित्यत्र बाष्कलशाखाध्ययनमनुक्रमणिकारेणाप्युक्तम्॥ गोतमादौशिजः कुत्सः पारुच्छेपादृषेः
परः॥ कुत्साद्दीर्घतमेत्येवं बाष्कलाध्ययने क्रमः॥ अस्यार्थः॥ गोतमादौशिजः कुत्सः॥ उप प्रयन्तो॥ नासत्याभ्याम्॥ अग्नि
होतारम्॥ इमं स्तोमम्॥ वेदिषदे॥ एष बाष्कलक्रम इत्यर्थः॥ अत्रैवमुक्ते उत्तममण्डले नवके अनुक्रमविपर्यासः॥
तच्च॥ स्वादोरभक्षिसूक्तान्ते अभि प्र वः सुराधसं प्र सु श्रुतमिति सूक्तद्वयं पठित्वा॥ अग्न आ याह्यग्निभिरिति पठेत्॥
ततः आ प्र द्रव्यध्याये गोर्धयेत्यनुवाको दशसूक्तात्मको शाकलस्य॥ पञ्चदशसूक्तात्मको बाष्कलस्य॥ तत्रोच्यते॥ गो
र्धयति सूक्तानन्तरं यथा मनौ सांवरणौ॥ यथा मनौ विवस्वति॥ उप मन्त्वा॥ एतत इन्द्र॥ भूरीदिन्द्रस्य॥ इत्यन्तानि पञ्च
सूक्तानि पठित्वा आ त्वा गिरो रथीरिवेति पठेयुः॥ अन्ते संसमित्सूक्तानन्तरं पञ्चदशऋचात्मकं सञ्ज्ञानमुशनावदत्त ॥भः
क्तं यो रावृणी मह इत्यन्तं वेदसमाप्तिरिति बाष्कलशाखाध्ययनं एवमध्ययनाभावात् शाखाभाव इत्यर्थः॥ सूक्तसहस्रस १०

प्रदशाधिकात् अष्टौसूक्तानिवाष्कलस्याधिकानीत्यर्थः॥ प्रतिते॥ युवंदेवा॥ यमृत्विजः॥ इमानिवामिनिचत्वारिवा
लखिल्यसूक्तानांलोपइत्यर्थः॥ ॥यस्तानृग्विद्दैदचैवाप्यधीतेसनाकपृष्ठंभजतेहशश्वत्॥ अस्यार्थः॥ यःना
नऋगर्थवित् वेदततः हवनपारायणेचअधीतेसः वेदिताध्येताचनाकपृष्ठंशश्वत्सदाभजते॥ हप्रसिद्धौ॥ इ
तोमुंलोकमेत्युततस्मान्नप्रच्यवतेहीत्यर्थः॥ ॥अथपारायणफलंतदुक्तमारण्यके॥ यत्संधिसंधिविवर्तयतिनं
निर्भुजस्यरूपमथयच्छुद्धेअक्षरेअभिव्याहरतितत्प्रतृण्णस्याग्रउएवोभयमन्तरेणोभयम्व्याप्तंभवत्यन्नाद्यका
मोनिर्भुजंब्रूयात्स्वर्गकामःप्रतृणमुभयकाममउभयमन्तरेणेति॥ अस्यार्थः॥ द्वयोःपदयोरक्षरयोर्वापिसन्धिस्तस्य
अविच्छेदाध्ययनंतन्निर्भुजंसंहितापारायणमुच्यते॥ शुद्धेद्वेपदेअक्षरेवासन्धिमकुर्वतोच्चारणंतत्प्रतृण्णंपदपा
रायणम्॥ संहितापदाभ्यामुभाभ्यांव्याप्तमुभयमन्तरेणक्रमपारायणमित्यर्थः॥ तथाचसतितिभिः कृत्वास्वरास्व
रंविजानातिमात्रामात्रांविभजंतेसासंहितेति॥ एवमेतांसंहितांयोवेदसन्धीयतेप्रजयापशुभिर्यशसाब्रह्मवर्च
सेनस्वर्गेणलोकेनसर्वमायुरेतीति॥ तस्मात्क्रमादृतेद्वेपदेसंहितांद्वेपदस्वरश्चनसिध्यति॥ द्वेपदेसिद्धेःउत्तरा
रम्भः कर्तुंनशक्यते॥ अतश्चपादार्धर्चक्रमसूक्तसिध्यर्थंभगवतापाञ्चालेनस्थापितानांपारायणाकर्मणांक्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मपारायणमुत्तमंभवतीतिचात्रश्लोकः॥प्रगाथेनपुरादानंदृष्ट्वाकुत्सोमहामुनिः॥अर्थवत्तंक्रमंब्रूयाद्देवतायाश्चयण
स्वतः॥अतोऋग्यजुषांबृहणंपदैःस्वरैश्चाध्ययनंतथात्रिभिःअस्यार्थः॥अतोपिअस्मादपिहेतोःक्रमःअथर्वानुभ
वति॥क्रमेणकृत्वाऋग्वेदपारायणेऋचाबृंहणंसाधारणंभवति॥इदमित्थमेवपाठइति॥स्वरमात्रादिरूपेणनि
श्चयोभवति॥तथायजुर्वेदपारायणेयजुषांबृंहणंनामसाधारणंस्वरमात्रादिरूपेणइदमित्थमेवपाठइतिनिश्चयो
भवतीत्यतिदेशइत्यलंप्रपञ्चेन॥अथपारायणविधिः॥ ॥अत्रादौकलशस्थापनाद्युक्तंमहार्णवे॥तीर्थेदेवालयेगे
हेप्रशस्तेसुपरिष्कृते॥कलशंसुदृढंतत्रसुनिर्णिक्तंसुभूषितम्॥पुष्पपल्लवमालाभिश्चंदनैःकुंकुमादिभिः॥मृत्ति
कापवसंमिश्रंवेदिमध्येन्यसेत्ततः॥पश्चाशद्भिःकुशैःकार्योब्रह्मापश्चान्मुखंस्थितः॥स्थापितःस्थापितःकुंभेचतुर्बा
हुःश्चतुर्मुखः॥वत्सजान्वाकृतिंवेदमुत्तराग्रैःकुशैःकृतम्॥ब्रह्मोपधानेदत्वातंततःस्वस्त्ययनंपठेत्॥प्रतिष्ठांकार
येत्पश्चात्पूजाद्रव्योमथोच्यते॥यज्ञोपवीतंनैवेद्यंवस्त्रचन्दनकुंकुमैः॥स्रक्धूपदीपताम्बूलैरेतैश्चापिपितामहम्॥
ब्रह्मजज्ञानमितिवागायत्र्यावाप्रपूजयेत्॥उपाध्यायञ्चसंपूज्ययथापाठंपठेत्ततः॥ततोहोमादिवक्ष्यमाणविधि रा.म.
नाकृत्वापठेदित्यर्थः॥तत्रैवबोधायनः॥ ॥स्थण्डिलंकल्पयित्वाग्निमुपसमाधायनंपरिस्तीर्याज्येनैताभ्योदेवताभ्योजु ११

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

होत्यग्नयेसोमायविश्वेभ्योदेवेभ्योब्रह्मणेऋषिभ्योऋग्भ्योयजुर्भ्यःसामभ्यः श्रद्धायैप्रज्ञायैमेधायैधारणायैश्रियैह्रि
यैसावित्र्यैसवित्रेप्रजापतयेकाण्डऋषयेअग्नयेकाण्डऋषयेविश्वेभ्योदेवेभ्यःकाण्डऋषिभ्यःसांहितीभ्योदेवता
भ्यउपनिषद्भ्योयाज्ञिकीभ्योदेवताभ्यउपनिषद्भ्योवारुणीदेवताभ्यउपनिषद्भ्योहव्यवाहायविश्वेभ्योवरुणेभ्योऽनुम
त्यैस्विष्टकृतेचष्टथक्स्वाहाकारेणहुत्वाव्याहृतिभिश्चहुत्वापुनःपरिषिञ्चतिसमाप्तेचैतायजुषातर्पयतिएवमृग्वे
दस्यकाण्डऋष्यादिवर्जमास्विष्टकृतस्तेषांस्थानेशतर्चिभ्योमाध्यमेभ्योगृत्समदायविश्वामित्रायवामदेवायात्रये
भरद्वाजायजामदग्न्यायगौतमायवसिष्ठायप्रगाथेभ्यःपावमानीभ्यःक्षुद्रसूक्तेभ्योमहासूक्तेभ्योमहानाम्नीभ्यइ
तिनतोवेदादिमारभ्यसन्ततमधीयीतेत्याहभगवान्बोधायनः॥पुनर्महार्णवः॥ ॥अथातःपारायणविधिंव्याख्या
स्यामआसमाप्तेर्नाश्नीयाद्यथाशक्तिंवापःपयःफलान्योदनंवाहविष्यंमात्रमश्नंभुक्त्वातदाशेषमधीयीतग्रामात्प्रा
च्यामुदीच्यांवादिश्युपनिष्क्रम्याग्निमुपसमाधायपरिस्तीर्यध्मंप्रज्वाल्याज्येनैताभ्योदेवताभ्योजुहोत्यग्नयेसोमायेन्द्रा
यप्रजापतयेबृहस्पतयेविश्वेभ्योदेवेभ्योब्रह्मणेऋषिभ्योऋग्भ्योयजुर्भ्यःसामभ्यः श्रद्धायैमेधायैप्रज्ञायैधारणायैसद
सस्पतयेऽनुमतयेश्रियैह्रियैसावित्र्यैसवित्रेप्रजापतयेकाण्डऋषयेसोमायकाण्डऋषयेग्नयेकाण्डऋषयेविश्वेभ्यो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च आ॰ देवेभ्यः काण्डऋषिभ्यः सांहितीभ्योदेवताभ्यउपनिषद्भ्यो याज्ञिकीभ्योदेवताभ्यउपनिषद्भ्यो वारुणीभ्योदेवताभ्यउप
१२ निषद्भ्योहव्यवाहायविश्वेभ्योवरुणेभ्योनुमत्यैस्विष्टकृतेचष्टयकृत्स्वाहाकारेणहुत्वाव्याहृतिभिश्चपुनः परिषिञ्चति
समाप्तेचैवयजुषातर्पयतीति॥अन्तेएताग्निसोमाद्याः यजुषापदेनसहतर्पयेत्॥ यद्वाभूर्देवांस्तर्पयामीत्यादियजुषातर्पयित्वाऽग्न्यादींस्तर्पयेदित्यर्थः॥महार्णवः॥एवंऋग्वेदिनांकाण्डऋष्यादिवर्जमासिष्टकृतस्ते यास्थाने
शतर्चिभ्यइत्यादिमहानाम्नीभ्यइत्यन्तंप्राग्वत्॥ततोवेदादिमारभ्यसन्ततमधीयीतनैतस्यान्तरानध्यायोनास्या
न्तराजननमरणेअशुचिः अशौचंनेत्यर्थः॥नान्तराव्याहरेन्नविरामेद्याक्तमधीयीत॥यावत्पर्यन्तंपठेत्तावत्पर्यन्तं
नविरमेन्नान्यच्चवदेदित्यर्थः॥यदन्तराविरमेत्त्रीन्प्राणानायम्यप्रणवंवाप्रविधायनयावत्कालमधीयीनसर्वंविशो
निशान्तरंसंग्रामात्संयम्यारण्यसलिलंलोप्यपरिदध्यात्॥निशान्तरंसन्ध्या॥निशादीन्लोप्यविस्प्यासमापयेदित्य
र्थः॥आदावन्तेचब्राह्मणभोजनंदक्षिणाञ्चदद्यादितिमहार्णवोक्तम्॥ ॥अथकमलाकरः॥यएतेनविधिनावेद
मधीयीतसततः पूतोवेदोभवतिमनःशुद्धिश्चभवति॥वेदरूपोभवतीत्यर्थः॥द्वाभ्यांपारायणाभ्यांऋग्भिश्चाऽभो रा॰
जनद्द्वाधीतेऽनृतेभ्यः प्रमुच्यतेत्रिभिर्बहुभ्यः पतनीयपातकेभ्यःशूद्रायांरेतः सिक्त्वागङ्गाप्सुवन्निमज्यश्चभव १२

For Private and Personal Use Only

तिचतुर्भ्यः शूद्रान्नभोजनात्स्त्रीसेवनाच्च॥ पञ्चभिरयाज्ययाजनादग्राह्यग्रहणात् षड्भिर्ब्राह्मणस्यलोहितकरणा
त्पशुहननात्सुवर्णस्तेयात्पतितसंयोगाच्च सप्तभिः प्राजापत्यस्यहीनचरणाद्यज्ञोपबन्धनाच्चाष्टभिश्चान्द्रायणगुरु
तल्पगमनाद्रजस्वलागमनाच्च॥ नवभिः सुरापानात्॥ दशभिः पुनर्जन्मेहजन्मकृतैः सर्वैः पापैः प्रमुच्यते स्वर्गलो
कंगच्छतीति॥ पितॄन्स्वर्गलोकंगमयति॥ अग्निष्टोमादिक्रतुभिरिष्टंभवति॥ वेदाध्यायी सदेवस्यापापश्चासत्यवाक्
शुचिः॥ यंयंकामयतेकामंतंतंवेदेनसाधयेत्॥ असाध्यंनास्तियत्किंचिद्ब्रह्मणोहिफलंमहत्॥ ऋग्विधाने॥ आदावे
वतुसाविन्याकर्मकुर्वीतशान्तये॥ पुष्टयेपशुलाभायधनलाभायभूतये॥ एषाहिसंहितादेवेसर्वब्रह्ममयीनिवृत्
॥ अग्रेणतपसादृष्टाविश्वामित्रेणधीमता॥ होमांश्चजपयज्ञांश्चनित्यंकुर्वीतवैतया॥ सर्वकामप्रसिध्यर्थंपरंब्रह्मेदमु
च्यते॥ एषावैप्रतिलोमोक्तापरः शत्रुविनाशनी॥ अक्षरप्रतिलोमेयमभिचारेषुशस्यते॥ सर्वसंहितयाप्रत्यूचंहोम
आज्येनतिलेनवा॥ आज्यंद्रव्यमनादेशजुहोतिषुविधीयतइतिब्राह्मोक्तेः॥ सर्वपापहरोहोमस्तिलैःसर्वत्रशस्यतइ
तिविष्णुधर्मोत्तरात्॥ शातातपः॥ कृच्छ्रोदेव्ययुतञ्चैववेदपारायणंतथा॥ तिलहोमसहस्रञ्चसममेतच्चतुष्टयम्॥ इ
दंकेवलम्॥ अन्येचान्द्रमसम्॥ इतिकमलाकरभट्टकृतोक्तवेदपारायणविधिःसमाप्तः॥ इतिचरणव्यूहे प्रथमखण्ड

 आख्यासामाप्ता॥ ॥व्याख्याचरणव्यूहस्यआद्यखण्डस्यतेनवै॥ यथामतिविरचिताकृष्णदेवप्रसादतः॥१॥ यजुर्वेदस्य
 षडशीतिभेदाभवन्तितत्रचरकानाम द्वादशभेदाभवन्तिचरकाआह्वरकाःकठाःप्राच्यकठाःकपिलकठाश्चारायणीयावारायणीयावार्त्तांतवेयाःश्वेताःश्वेततराऔपमन्यवःपाताण्डिनीयामैत्रायणीयाश्चेति॥ तत्रमैत्रायणीयानामसप्तभेदाभवन्तिमानवादुंदुभाश्चैकेयावाराहाहारिद्रवेयाश्यामाश्यामायणीयाश्चेतितेषामध्ययनमष्टौशतंयजुःसहस्राण्यधीत्यशाखापारोभवतितान्येवद्विगुणान्यधीत्यपदपारोभवतितान्येवत्रिगुणान्यधीत्यक्रमपारोभवतिषडंगान्यधीत्यषडंगविद्भवतिशिक्षाकल्पोव्याकरणंनिरुक्तंछन्दोज्योतिषमित्यंगानितत्रप्राच्यामुदीच्यांनैरृत्यांनैरृत्यास्तत्रवाजसनेयानामसप्तदशभेदाभवन्तिजाबालाबहुधेयाःकाण्वामाध्यंदिनाःशापीयास्थापयनीयाःकापालाःपौंड्रवत्साःआवटिकाःपरमावटिकाःपाराशर्यावैद्येयावैन्धेयाऔधेयागालवाबैजवाःकात्यायनीयाश्चेतिप्रतिपदमनुपदंछन्दोभाषाधर्मोमिमांसान्यायस्तर्कइत्युपाङ्गानिभवन्त्युपज्योतिषंसाङ्गलक्षणंप्रतिज्ञानुवाक्यःपरिसङ्ख्याचरणव्यूहःश्राद्धकल्पःप्रवराध्यायश्चशास्त्रक्रतुसङ्ख्यानुगमयज्ञपार्श्वानिहोत्रकंपशवोक्थ्यानिकूर्मलक्षणमित्यष्टादशपरशिष्टानिभवन्तिद्वेसहस्रेशतेन्यूनेमन्त्रेवाजसनेयके॥ इत्युक्तंपरिसङ्ख्यातं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेतत्सकलंसमुक्रियम॥ग्रन्थाश्चपरिसङ्ख्याताब्राह्मणञ्चचतुर्गुणम्॥तत्रतैत्तिरीयकानामद्विभेदाभवन्ति
औख्याकाण्डिकेयाश्चेतितत्रकाण्डिकेयानामपञ्चभेदाभवन्त्यापस्तंबीबौधायनीसत्याषाढीहिरण्यकेशीऔ
धेयीश्चेतितत्रकठानान्तूपगायतुविशेषचतुश्चत्वारिंशत्सुपग्रन्थानिमन्त्रब्राह्मणयोर्वेदस्त्रिगुणंयत्रपठ्यते॥
यजुर्वेदस्सविज्ञेयोन्येशाखान्तरास्मृतास्तेषामध्ययनंप्रवचनीयाश्चेति॥२ यजुर्वेदस्यषडशीतिभेदाभवन्ति॥अ
त्रशाखाभेदोग्राह्यः॥षट्अशीतिर्भेदाइत्यर्थः॥तत्रचरकानामद्वादशभेदाभवन्ति॥इतिस्पष्टार्थः॥तेकेभेदाः॥
चरकाः॥आह्वरकाः॥कठाः॥प्राच्यकठाः॥कपि लकठाः॥आरायणीयाः॥वारायणीयाः॥वार्त्तान्तवेयाः॥श्वेताः
॥श्वेततराः॥औपमन्यवः॥मैत्रायणीयाश्चेति॥इतिमैत्रायणीयशाखागणाइत्यर्थः॥मैत्राय णीयस्तुवाजसनीय
नेदाध्यायी॥मानवकर्मसूत्रम्॥तेषामध्ययनमष्टोत्तरशतंयजुःसहस्राण्यधीत्यशाखापारोभवति॥तेषामध्यय
नेद्विचत्वारिंशद् ध्यायाः॥अष्टशताधिकसहस्रमन्त्राइत्यर्थः॥तान्येवद्विगुणान्यस्यपदपारोभवति॥द्विवारपठनात्प
दपारायणफलंभवतीत्यर्थः॥तान्येवत्रिगुणान्यधीत्यक्रमपारोभवति॥त्रिवारपठनात्क्रमपारायणफलंभवतीत्य
र्थः॥पदक्रमाध्ययनंभवतीत्यर्थः॥तत्रप्राच्यांउदीच्यांनैऋत्यांनैर्ऋत्यास्तत्रवाजसनेयानांपञ्चदशभेदाभवन्ति॥

For Private and Personal Use Only

चा·व्या· प्राच्योदीच्यनैर्ऋत्यानिलोदिशायांवाजसनीयवेदोत्पत्तिः॥अग्रेवक्ष्यामः॥इतरदेशेषुवेदशाखयोर्विभागउच्यते॥
१४ तच्चमहार्णवे॥पृथिव्यामध्यरेखाचनर्मदापरिकीर्तिता॥दक्षिणोत्तरयोर्भागेशाखाभेदश्चउच्यते॥नर्मदादक्षिणे
भागेआपस्तंब्याश्वलायनी॥राणायनीपिप्पलाचयज्ञकन्याविभागिनः॥माध्यंदिनीशांखायनीकौथुमीशौनकीत
था॥नर्मदोत्तरभागेचयज्ञकन्याविभाग्निनः॥तुङ्गाकृष्णातथागोदासह्याद्रिशिखरावधि॥आआंध्रदेशपर्यन्तंबह्वृ
चश्चाश्वलायनी॥उत्तरेगुर्जरेदेशेवेदोबह्वृचकीर्तितः॥कौषीतकीब्राह्मणञ्चशाखाशांखायनीस्थिता॥आन्ध्रादिद
क्षिणाग्नेयीगोदासागरआवधि॥यजुर्वेदस्तुतैत्तिर्योआपस्तम्बीप्रतिष्ठिता॥सह्याद्रिपर्वतारंभादिशांनैऋत्यसाग
रात्॥हिरण्यकेशीशाखाचपर्शुरामस्यसंनिधौ॥मयूरपर्वताच्चैवयावद्गुर्जरदेशतः॥व्याप्तावायव्यदेशात्तुमैत्राय
णीप्रतिष्ठिता॥अङ्ग·वङ्ग·कलिङ्ग·श्चकानीनोगुर्जरस्तथा॥वाजसनीयशाखाचमाध्यंदिनीप्रतिष्ठिता॥ऋषिणाया
ज्ञवल्क्येनसर्वदेशेषुविस्तृता॥वाजसनीयवेदस्यप्रथमाकाण्वसञ्ज्ञकेति॥व्यासशिष्योवैशंपायननिरुदाख्यो
यजुर्वेदंपठित्वाशिष्यान्चकार॥तच्चभागवते॥वैशंपायनशिष्यावैचरकाध्वर्यवोभवन्॥यच्चेरुर्ब्रह्महत्यांहःक्ष रामः
पणंस्वगुरोर्व्रतम्॥याज्ञवल्क्यश्चतच्छिष्योअहाहोभगवान्कियत्॥चरितेनाल्पसारेणचरिष्येहंसुदुस्तरम्॥इत्यु १४

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्तोगुरुरप्याह कुपितोपि ह्यलन्त्वया॥ विप्राकमन्त्राशिष्येणअधीतंतुत्यज त्विति॥ देवरातसुतः सोपिविदित्वा
यजुषांगणम्॥ ततोगतोथमुनयोदहशु स्तान्यजुर्गणान्॥ यजूंषीतेतिरीभूत्वातंल्लोलुपतयाददुः॥ तैत्तिरीयाइ
तियजुःशाखाआसंत्सुपेशलाः॥ याज्ञवल्क्यस्ततोब्रह्मन्छन्दांस्यधिगवेषयन्॥ गुरोरविद्यमानानितपस्तेपे के
मीश्वरम्॥ याज्ञवल्क्यउवाच॥ ॐनमोभगवतेत्यादि॥ जीर्णभुक्तेउच्छिष्टंवान्तेयातयाम शब्दइतिनिघण्टुः॥ ए
वमेवार्थः यातयामयजुः॥ कासउपसरमित्यतंन्तुष्टाव॥ एवमुक्तःसभगवान्वाजीरूपधरोहरिः॥ यजूंष्ययातया
मानिमुनयेदात्प्रसादतः॥ यजुर्भिरकरोच्छाखादशपचतयाविभुः॥ जगृहुर्वाजसन्यस्ताः काण्वामाध्यंदिनादयः
॥ इत्यादिपर्यालोचनयायजुर्वेदत्यागानन्तरं देवरातसुतेनअब्राह्मणत्वभियासवितासूर्योवाजीरूपेणवाजभ्यः
केसरेभ्यः वाजेनवेगेनवासन्यस्तास्त्यक्ताः॥ शाखावाजसनेयीसंज्ञाशाखारण्डत्वपरिहारार्थंचातुर्वैद्यत्वसङ्ख्या
संरक्षणार्थंचवाजीरूपेणसूर्येणायातयामानियजूंषिमुनयेदत्तानितैर्यजुर्भिरुपरितैः समुनिस्तावाजसंन्यः पञ्च
दशशाखाअकारोत्॥ तस्माच्चमुनेःकाण्वामाध्यंदिनादयःअध्ययनंचक्रुः॥ तेपञ्चदशभवन्ति॥ अथप्रसङ्गात्यजु
र्वेदस्यशाखाप्रणयनविचारः किंचिदुच्यते॥ तत्रयजुर्वेदएवप्रथमः॥ तथाचविष्णुपुराणे॥ एकएवयजुर्वेदस्तंचतु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्र्यंबकल्पयदिति॥यजुर्वेदःयज्ञोपयोगित्वरूपयोगात्सर्वोपिवेदोयजुर्वेदइत्युच्यते॥यजुर्वेदस्यशाखाभेदंस
विस्तरमाह॥यजुर्वेदतरोःशाखाःसप्तविंशन्महामतिः॥वैशंपायननामासौव्यासशिष्यश्चकारवै॥शिष्येभ्यःप्रददै
ताश्चजगृहुस्तेप्यनुक्रमात्॥याज्ञवल्क्यस्तस्याभूद्ब्रह्मराजःसुतोद्विजः॥शिष्यःपरमधर्मज्ञोगुरुवृत्तिरतःसदा॥
ऋषिर्योद्य महामेरौसमाजेनागमिष्यति॥तस्यवैसप्तरात्रन्तुब्रह्महत्याभविष्यति॥पूर्वमेवंमुनिगणैःसमयोयंकृ
तोद्विज॥वैशंपायनएकस्तुतंव्यतिक्रान्तवांस्तथा॥स्वस्त्रीयंबालकंसोथपदास्पृष्टमघातयत्॥शिष्यानाहचभोःशि
ष्याब्रह्महत्यापरावृते॥चरध्वंमत्कृतेसर्वेनविचार्यमिदंतथा॥अथाहयाज्ञवल्क्यस्तं किमेतैर्बहुभिर्द्विजैः॥क्लेशितै
रल्पतेजोभिश्चरिष्येहमिदंव्रतम्॥ततःक्रुद्धोगुरुःप्राहयाज्ञवल्क्यंमहामुनिम्॥मुच्यतांयत्त्वयाधीतंमत्तोविप्राव
मानकः॥निस्तेजसावदस्येतान्यस्त्वंब्राह्मणपुङ्गवान्॥तेनशिष्येणनार्थोस्तिममाज्ञाभङ्गकारिणा॥याज्ञवल्क्यस्त
तःप्राहभक्त्यैततेनयोदितम्॥ममाप्यलंत्वयाधीतंयन्मयातदितंद्विज॥श्रीपराशरउवाच॥ ॥इत्युक्त्वारुधिरा
क्तानिस्वपाणिवयजूंष्यथ॥छर्दयित्वाददौतस्मैययौचस्वेच्छयामुनिः॥यजूंष्यथविसृष्टानियाज्ञवल्क्येनवैद्विजाः
॥जगृहुस्तित्तिरोभूत्वातेतित्तिर्यास्तुततःस्मृताः॥ब्रह्महत्याव्रतंचीर्णंगुरुणाचोदितंतुयैः॥चरकाध्वर्यवस्तेतुचरणा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्मुनिसत्तम॥याज्ञवल्क्योपिमैत्रेणप्राणायामपरायणः॥तुष्टावप्रणतंसूर्यंयजूंष्यभिलिषन्तमः॥अस्यार्थः॥यजुर्वे
दोत्तरेत्यादिनासप्तविंशतिः॥द्पञ्चप्रधानशाखानांसङ्ख्या॥ब्रह्माण्डपुराणोक्तषडशीतिशाखाभेदस्तुप्रति
शाखाविवक्षयातांश्चशुक्लयजुःपञ्चदशकंसहेत्येकशाखाआपस्तंबोक्ताइतिद्रष्टव्यम्॥याज्ञवल्क्येनछर्दितैर्य
जुर्भिस्तैत्तिरीयशाखाबभूव॥तेयाज्ञवल्क्यव्यतिरिक्तावैशंपायनस्यशिष्याःयाज्ञवल्क्येनछर्दितंविप्ररूपेणगृही
तुमनुचितमितितित्तिरपक्षिणोभूत्वायाज्ञवल्क्यविसृष्टानियजूंषिजगृहुः॥ततस्ताःशाखास्तैत्तिरीयाबभूवुरित्य
र्थः॥याज्ञवल्क्यव्यतिरिक्तानांचरकाध्वर्युसञ्ज्ञांनिर्वक्ति॥चकाराध्वर्यवस्तेवैवरणान्मुनिसत्तमेति॥वराध्वर्यव
मितिपाठेवरणाद्यजुषाग्रहणात्॥आध्वर्यवश्चक्रुरित्यर्थः॥यजूंषिवैशंपायनेनाधीतानि॥याज्ञवल्क्यस्ततोब्रह्म
न्छन्दांस्यधिगवेषयन्॥गुरोरविद्यमानानिसूपतस्थेर्कमीश्वरमितिभगवतोक्तेः॥ याज्ञवल्क्यउवाच॥नमःस
वित्रेद्वारायमुक्तेरमिततेजसे॥ऋग्यजुःसामरूपायत्रयीधामात्मनेनमः॥इत्येवमादिभिस्तेनस्तूयमानःसवैरवि
॥वाजीरूपधरःप्राहव्रजन्नामभिवांछितम्॥जाग्यवल्क्यस्तथाप्राहप्रणिपत्यदिवाकरम्॥यजूंषितानिमेदेहिया
निसन्तिनमेगुरुः॥पाराशरउवाच॥ एवमुक्तोददौतस्मैयजूंषिभगवान्रविः॥अयातयामसञ्ज्ञानियानिनवेतितद्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुः॥यजूंषियैरधीतानितानिविप्रद्विजोत्तम॥वाजिनस्तेसमाख्याताः सूर्यांशः संभवद्यतः॥शाखाभेदस्तुतेषांवेद
शपञ्चचवाजिनाम्॥काण्वायास्तुमहाभागयाज्ञवल्क्यप्रकीर्तिताः॥इति॥तदुरुःवैशंपायनोयानिनवेतितेषां
व्यासेनानुपदिष्टत्वादितिभावः॥वाजिनःसमाख्याताःवाजिरूपसूर्यप्रोक्तसंहिताध्यापित्वात्॥अग्निपुराणेपि
॥काण्वामाध्यंदिनीसञ्ज्ञाकठीमाध्यकठीतथा॥मैत्रायणीयसञ्ज्ञाचतैत्तिरीयाभिधानका॥वैशंपायनिकेत्याद्याः
शाखायाजुषसञ्ज्ञिता इति॥आदिशब्देनएतदन्यशाखाग्रहणम्॥तदुक्तंनृसिंहपराशरे॥ ॥प्रथमोयाज्ञव
ल्क्यश्चआपस्तंबोद्वितीयकः॥ततीयोमूलघटकश्चतुर्थोवाणसःस्मृतः॥पञ्चमःसहवासश्चषष्ठःस्याद्गोत्रपण्डि
तः॥रामानुजःसप्तमोक्तअष्टमश्चगयावलः॥त्रिदण्डोनवमःप्रोक्तोनवशाखाःप्रकीर्तिताः॥तन्मध्येसहवासस्तुक
र्मनिष्ठोद्विजाग्रणी॥एवंशाखादेशभेदात्बहवस्तुद्विजातयः॥तत्रापिकर्मनिष्ठाश्चग्राह्यायज्ञादिकर्मसु॥हीना
द्विजातयःसर्वेत्याज्याःसर्वत्रकर्मसु॥हीनाद्विजातयः॥अभीरादयः॥परदेशेत्रिदण्डिनोवेषधारिणः॥सन्यासि
नःस्वग्रामेपरिग्रहयुक्तास्तेत्रिदण्डिनः॥गोत्रपण्डितःवैश्ययाजकः॥मूलघटकःनागवल्लीरोपकः।तिर्गूलाइति
प्रसिद्धाः॥अन्येवाणसादिप्रसिद्धाः॥केचित्धर्मशास्त्रानभिज्ञाःवानप्रस्थाज्ज्ञातावाणसाइतिवदंतितद्वाक्यंआरू



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ढपतितपरम्॥तदुक्तं कौर्मेवानप्रस्थाश्रमधर्मे॥यस्तुपत्न्यावनंगत्वामैथुनंकामतश्चरेत्॥तद्व्रतंतस्यलुप्येतप्राय
श्चित्तीयतेद्विजः॥तत्रयोजायतेगर्भोनसंस्पृश्योद्विजातिभिः॥नहिवेदेऽधिकारोस्यतद्वंशेप्येवमेवहि॥आरूढप
तितःप्रोक्तोमुनिभिस्तत्वदर्शिभिरिति॥वाजसनीयवेदोस्यास्तीत्यर्थः॥ ॥काण्वाःमाध्यंदिनाःशाबीयाःस्थापा
यनीयाःकापालाःपौंड्रवत्साःआवटिकाःपरमावटिकाःपाराशर्यावैधेयावैनेयाःऔधेयाःगालवाबैजवाःकात्या
यनीयाश्चेति॥पञ्चदशशाखाइत्यर्थः॥प्रतिपदमनुपदम्॥अतिपदमनुपदमन्यपदकर्तव्यमित्यर्थः॥छन्दःछ
न्दोरत्नाकरादि॥भाषाशब्दपरिभाषा॥धर्मशास्त्रंमिताक्षरादि॥मीमांसाप्रसिद्धा॥न्यायस्तर्कः॥इतिषडंगानि॥उ
पज्योतिषंज्योतिःशास्त्रम्॥साङ्गलक्षणंसामुद्रिकादि॥प्रतिज्ञानुवाक्यः अनेनवाक्येनअयंसिद्धःस्यात्॥परिसं
ख्याभूगोलादि॥अतश्चरणव्यूहः॥श्राद्धकल्पः॥प्रवराध्यायश्च॥शास्त्रक्रतुसङ्ख्याकल्पादिषुज्ञातव्या॥अनुग
मयज्ञक्रिया॥पार्श्वानिहोत्रकम्॥यज्ञक्रियाहौत्रम्॥पशवोक्थानिपशुयज्ञः॥कूर्मलक्षणंयज्ञेप्रसिद्धम्॥इतिअ
ष्टादशपरिशिष्टानिभवन्ति॥द्वेसहस्रेशतेन्यूनेमन्त्रेवाजसनेयके॥इत्युक्तंपरिसङ्ख्यानमेतत्सकलंसशुक्रि
यम्॥वाजसनेयकेवेदेनवशताधिकसहस्रमन्त्राइत्यर्थः॥एतत्सकलंसशुक्रियंमध्याह्नेशुक्लवर्णेनसूर्येणद

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विज्ञेया२

ततः सशुक्लयजुः॥ परिसङ्ख्यातमित्यर्थः॥ वेदोपक्रमणे चतुर्दशीपौर्णिमाग्रहणात् शुक्लयजुः॥ प्रतिपदाशुक्लपौ
र्णिमाग्रहणात्कृष्णयजुरिति वा॥ ब्राह्मणञ्च चतुर्गुणम्॥ वेदचतुर्गुणं ब्राह्मणमित्यर्थः॥ यजुर्वेदतरोरासन्शा
खा एकोत्तरं शतम्॥ तत्रापि शिवशाखा दश पञ्च च वाजिनाम्॥ तत्रापि मुख्याः शाखा या काण्वसञ्ज्ञिकाः॥ ग्रन्था
न्तरे॥ तैत्तिरीयकानादिभेदा भवन्ति॥ औख्याकाण्डिकेयाश्चेति॥ तेषामध्ययनपरिमाणम्॥ काण्डास्तु सप्त विज्ञे
याः प्रश्नाश्चाधिकवेचतुः॥ चत्वारिंशत्तु विज्ञेया अनुवाकाः शतानि षट्॥ एकपञ्चाशदधिकसङ्ख्या पञ्चाशिउ
च्यते॥ द्विसहस्रं चैकशतमष्टानवति चाधिका॥ लक्षैकन्तु द्विनवतिसहस्राणि प्रकीर्तिता॥ पदानि नवतिश्चैवत
था अक्षर उच्यते॥ लक्षद्वयं त्रिपञ्चाशत्सहस्राणि शताष्टकम्॥ अष्टषष्ट्यधिकं चैव यजुर्वेदप्रमाणकः॥ काण्डा
नि॥७॥ प्रश्नः॥४४॥ अनुवाकः॥६५१॥ पञ्चाशी॥२१९८॥ पदानि॥१९२९०॥ अक्षराणि॥२५३८६८॥ शाखावा
क्यान्ययुतानि सहस्राणि नवानि च॥ चतुःशतान्यशीतिश्च अष्टौ वाक्यानि गण्यते॥ इति ब्राह्मणे अष्टौ वाक्यस
ङ्ख्या॥१९४८०॥ इति तैत्तिरीयनिगदवेदाख्यसङ्ख्या उक्ता इत्यर्थः॥ तत्र कण्ठानान्नूपगायनु चतुश्चत्वारिंश राम:
दुपग्रन्थाः॥ मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते॥ यजुर्वेदः स विज्ञेय अन्ये शाखान्तराः स्मृताः॥ चतुश्चत्वारिंश ११

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुपग्रन्थाः॥अध्यायाः समीपेउक्ताः चतुश्चत्वारिंशत्॥मन्त्रश्चब्राह्मणञ्चमन्त्रब्राह्मणेतयोः मन्त्रब्राह्मणयोः
—— वेदइतिसञ्ज्ञा॥तदुक्तम्॥मन्त्रब्राह्मणयोर्वेदइतिनामधेयमित्युक्तंशाखीयप्रातिशाखीयभाष्यका
रेणआपस्तंबसामान्यसूत्रभाष्यकारेणकपर्दिनाधूर्त्तस्वामिनाचमन्त्रोनामसंहितामन्त्रस्तादृक्मन्त्ररूप
संहितायाः तन्मध्येएवतदग्रेब्राह्मणत्वेनपठनमित्युभययापिसंहितात्वेनपदत्वेनक्रमत्वेनचपठनंत्रिगुणं
पठनमितिसमन्त्रब्राह्मणयोर्वेदस्त्रिगुणंयत्रपठ्यतइत्यस्यार्थः॥एतादृशपठनंशाखायाअध्ययनंसयजुर्वे
दस्तच्चतैत्तिरीयशाखायामेवास्ति॥तथाहिसंपश्यामिप्रजाअहमिडप्रजसोमानवीरितिसंहितामन्त्रः॥एतस्यै
ब्राह्मणंसंहितायामेवतदग्रएवसंपश्यामिप्रजाअहमित्याहयावन्तएवेतिब्राह्मणमित्युभयोरपिसंहितात्वेन
पदत्वेनक्रमत्वेनपठनंत्रिगुणितपठनंभवति॥एतादृशमुदाहरणान्तरमाह॥इमामगृभ्णन्रशनामृतस्यपूर्वे
आयुषिविदथेषितिसंहितामन्त्रः॥एतस्यैवब्राह्मणंसंहितायामेवतदग्रेएवसंहितारूपेणवर्त्तते॥तत्कथमि
त्यपेक्षायामाह॥इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्तइतिब्राह्मणम्॥अनयोरपित्रिगुणत्वेनपठन
म्॥उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयइतित्रिगुणेनपठनंभवति॥एतेत्रिगुणाःकस्याअपिशाखायांनभव

For Private and Personal Use Only

च.व्या. न्ति॥ किंतुगाथाग्रन्थत्वात्॥ एवमन्यानिबहून्यपिवाक्यानिसन्तितानिविस्तरभयान्नोक्तानि॥ अतःकारणात्॥ अ
१८ न्येशाखान्तरास्मृताः॥ तेषामध्ययनंप्रवचनीयाश्चेति॥ एतेषांशाखानांअध्ययनंप्रवचनीयाः प्रतिवचनीयत्वेन
समाप्तमित्यर्थः॥२॥ ॥इतिचरणव्यूहेद्वितीयखण्डआस्यासमाप्ता॥ सामवेदस्यखिलसहस्रभेदा आसीदनध्या
येष्वधीयानास्तेवज्रेणशक्रेणाभिहताः प्रनष्टाः शेषान्प्रवक्ष्याम्यासुरायणीयावासुरायणीयाः प्राञ्जलऋग्वैने
भिधाः प्राचीनयोग्यानयोग्याचेतितत्रराणायनीयानामनवभेदाभवन्तिराणायनीयाः शाट्यायनीयाः सात्य
मुद्गलाः खल्वलामहाखल्वलालांगलागौथुमागौतमाजैमिनीयाश्चेतितेषामध्ययनमष्टादशानिदशतिर्दश
सप्तसुत्रालखिल्याः सुपर्णः प्रैस्यएतत्सामगणंस्मृतम्॥३॥ आसांषोडशशाखानांमध्येतिस्रः शाखाविद्यन्ते॥
ताश्चगुर्जरदेशेकौथुमीप्रसिद्धा॥ कर्नाटकेजैमिनीप्रसिद्धा॥ महाराष्ट्रदेशेराणायनीयाचेति॥ एषामध्य
यनम्॥ अष्टौसामसहस्राणिछन्दोगार्चिकसंहिता॥ गानानितस्यवक्ष्यामिसहस्राणिचतुर्दश॥ अष्टौशता
निज्ञेयानिदशोत्तरास्तथैवच॥ ब्राह्मणं चोपनिषदंसहस्रत्रितयंतथा॥३॥ ॥अथर्ववेदस्यनवभेदाभवन्ति रा
पैप्पलादान्ताः प्रदान्तास्तौताऔताब्रह्मदापलाशौनकीवेददर्शीचरणव्यूहंविद्याश्चेतितेषामध्ययनंपञ्च १८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सामवेद इति किलेति प्रसिद्धो सहस्रभेदा आसीत्॥ सहस्रभेदमध्ये शक्रेण वज्रेणाभिहता अनष्टाः अनध्यायेष्वधीयानाः स्त्री मन्ते विद्युता खलु इति॥ शेषान् अहतान् शाखापाठकान्॥ व्याख्यास्यामः॥ आसुरायणीया वासुरायणीया वार्तान्तरेया प्राञ्जलऋजुग्वैनविधाः। प्राचीनयोग्या। राणायनीयाश्चेति। राणायनीयानां नवभेदा भवंति। राणायनीयाः शाट्यायनीयाः सत्यसमुद्गतः खल्वला महाखल्वला लाङ्गलाः कौथुमी गौतमी जैमिनीयाश्चेति॥ तेषामध्ययनं अष्टौ सामसहस्राणि सामानि चचतुर्दशान्यष्टौशतानि दशभिर्दशसप्तसुवालखिल्यः सुपर्णः प्रेत्य मे तत्साम गणसूत्रम्॥ अथ प्रकारान्तरेणाह॥ तत्र राणायनीयानां सप्तभेदा भवन्ति। राणायनीयाः। सासत्यमुग्राः। कालेया महाकालेया लाङ्गलायनाः शार्दूलाः॥ कौथुमाश्चेति॥ तत्र कौथुमानां षट्भेदा भवन्ति॥ कौथुमाः॥ १॥ आसुरायणाः॥ २॥ वात्सायनाः॥ ३॥ प्राञ्जलिद्वैनभृतः॥ ४॥ प्राचीनयोग्याः॥ ५॥ नैगमीयाः॥ ६॥ इति तेषां कौथुमादीनामध्ययनम्॥ अशीतिशतमाग्नेयं यावमानं चतुः शतम्॥ ऐन्द्रं तु षड्विंशतियानि गायन्ति सामगास्तानि सूक्तानि अधीसे चण्डा उत्कृष्टाः ते चण्डतराः अत्युत्कृष्टा भवन्ति शिष्टानि व्यतिरिक्तानि अधीत्य पठित्वा शिष्टा विंशतिको भवन्ति शिष्टान् प्रामाणिकान् आविंशतिशिष्टेषु वा शिष्टभागाः प्रवेशयोग्याः शिष्टा अष्टाविंशतिगणानां पूरकाः सर्वश्रेष्ठो भवतीत्यर्थः। तत्र सूक्तेषु

For Private and Personal Use Only

केचिन्मन्त्रतंत्राइतिमन्त्राश्चतुर्धाविधीयते।आचार्यः तदाह्मजक्तन्त्रम्॥१॥सम्बलन्त्रम्॥२॥सन्त्वालक्षणम्॥३॥धातु
तुलक्षणमिति॥४॥इदानींसामसङ्ख्यामाह॥अष्टौसामसहस्राणिसामानिचचतुर्दश।अष्टौशतानिनवतिर्विंशतिर्वा
लखिल्यकम्॥सरहस्यंससुपर्णप्रेस्पतत्सामदर्पणम्॥सारण्यकानिसौपर्णानि॥तत्सामगंस्मृतम्॥अशीतिश
तमाग्नेयम्॥१८०॥पावमानम्॥१०४॥ऐन्द्रन्तु॥२६॥शिष्टा॥२८॥गणाःपूरकाः अष्टौसामसहस्राणिसामानिच
चतुर्दश अष्टौशतानिनवतिर्विंशतिंवालखिल्यकम्॥अस्यार्थः॥८८१४॥अङ्कतोज्ञातव्यः॥अन्यशाखासङ्ख्या
माह।नवतीतिसुपर्णप्रेसः कश्चिच्छाखाभेदः तेनसहवर्तमानः ससुपर्णप्रेसः सुपर्णप्रेसेपासहितोवालखि
ल्यः शाखाभेदोनवतिः नवतिसङ्ख्याकाः दशदशतयोयस्मिन् सनवतिदशतिः॥दशतिरितिदशसङ्ख्यास
ङ्ख्यादशगुणानवतिरित्यर्थः॥अङ्कतोपि॥९०॥सारण्यकानिआरण्यकानिआरण्यकेनोपनिषद्भागेनसहस्र
वर्तमानानिसौपर्णानिसूर्यदेवतानिसूक्तानि॥तत्रवालखिल्यशाखायामेव॥आरण्यकंसूर्यसूक्तंसुवर्णप्रेसवाल
खिल्यानिमिलित्वानवशतानीत्यर्थः निगमयंतिएतदितिएतत्पूर्वोक्तसामसमूहः स्मृतंकथितम्॥गणशब्दस्य
वलीयस्त्वंछान्दसी॥राणायनीसात्यमुग्रीदुर्वासा।अथभागुरीगौरुण्डी।गौर्गुजवीर्भगवानौपमन्यवः।।१।दारालोगा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्यैसावर्णीबर्षम्यष्मतेदश॥कुथुमिशालिहोत्रश्चजैमिनिश्चत्रयोदशाइत्येतेसामगाचार्याः स्वस्तिंकुर्वन्तुतर्पिताइति
॥२॥इतिचरणाव्यूहभाष्येतृतीयःखण्डः॥अथर्ववेदस्यनवभेदाभवन्तिपैप्पलादान्ताप्रदातांस्ताऔताब्रह्मदायश
शौनकीवेददर्शीचरणविद्याश्चेतितेषामध्ययनंपञ्चकल्पातिभवन्ति।कल्पोपञ्चशतैरपिनक्षत्रकल्पोविधानकल्पो
विधिविधानकल्पोसंहिताताकल्पः।शान्तिकल्पश्चेति।सर्वेषामेववेदानामुपवेदाभवन्ति।ऋग्वेदस्यायुर्वेदउपवेदो।
यजुर्वेदस्यधनुर्वेदउपवेदो।सामवेदस्यगान्धर्ववेदउपवेदो।थर्ववेदस्यशस्त्रशास्त्राणिभवन्ति।ऋग्वेदस्याग्निगोत्रंब्र
ह्मदैवत्यंगायत्रंछन्दो।यजुर्वेदस्यभारद्वाजगोत्रंविष्णुदैवत्यंत्रैष्टुभंछन्दः।सामवेदस्यकाश्यपगोत्रंरुद्रदैवत्यंजागतं
छन्दोऽथर्ववेदस्यपैतानगोत्रमिन्द्रदैवत्यमानुष्टुभंछन्दः ऋग्वेदोरूपवर्णः पद्मपत्रायताक्षः सुविभक्तग्रीवः कुचि
न्तकेशः श्मश्रुपिंगाक्षप्रमाणेनद्विरत्निमात्रोयजुर्वेदः। दीर्घः कंपोलस्ताम्रवर्णोकांचननयनंआदित्यवर्णेनषं
चारत्निमात्रःसामवेदोनित्यंस्रग्वीशुचिःवासशमीदान्तोशमीदण्डीकांचननयनश्वेतवर्णेनषडरत्निमात्रोऽथर्ववेदस्ती
क्ष्णश्चण्डःकामःकामरूपीसुइकर्माश्वेतसाध्यवशीश्चसजलमूर्द्धनिगालवः स्वदारजुष्टः परस्त्रियान्यपश्चेतिपइ
दंदैवतरूपंगोत्रप्रमाणंछन्दोवर्णोवर्णयन्ति।जन्मजन्मनिवेदयारोभवन्तिजन्मजन्मनिवेदधारोभवन्तिअप्रहितःप्र

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च.व्यू. हितोभवतिअव्रतोव्रतीभवत्यब्रह्मचारीब्रह्मचारीभवतिजातिस्मरोजायतेनमः शौनकायनमः शौनकायनमः परमःप
२० रमऋषिभ्योनमः परमऋषिभ्यः॥यइदंचरणव्यूहं पर्वसुश्रावयेद्द्विजः।धौतपाप्माशुचिर्विप्रोब्रह्मभूयायकल्पते॥१॥
यइदंचरणव्यूहंश्राद्धकालेसदापठेत्।अक्षय्यंतद्भवेच्छ्राद्धंपितॄंश्चैवोपतिष्ठति॥२॥यइदंचरणव्यूहंगुर्विण्यःशृ
णुतेस्त्रियः पुमांसंसंजनयेत्पुत्रंसर्वज्ञंवेदपारगम॥३॥योधीतेचरणव्यूहंसविप्रः पङ्क्तिपावनः।तारयत्सखिलान्पूर्वा
न्पुरुषान्सप्तसप्तच॥४॥योनामानिपुराणवेदाअमृतत्वंचगच्छति॥लोकातीतंमहाशान्तममृतत्वंचगच्छतिलोकाती
तंमहाशान्तममृतत्वंचगच्छत्योंनमः इत्याहभगवान्व्यासः पाराशर्यः नमः परमऋषिभ्योनमः परमऋषिभ्यः।तंवेद
शास्त्रपरिनिश्चितशुद्धबुद्धिंचर्माम्बरंसुरमुनींद्रनुतंकवीद्रम॥कृष्णद्युतिंकनकपिङ्गजटाकलापंव्यासंनमामिशिर
सातिलकंमुनीनाम्॥५॥इतिचरणव्यूहेचतुर्थः खण्डः॥अथप्रकान्तरमाह॥अथर्ववेदस्यनवभेदाभवन्तिपिप्प
ला।शौनका।दामोदा।तोतायना।जावाला।ब्रह्मपलाशकुनखी।देवदर्शी।चारणविद्याश्चेति तेषामध्ययनं द्वादशैवसह
स्राणि पञ्चकल्पानिभवन्ति।कल्पेकल्पेपञ्चशतानिभवन्ति।नक्षत्रकल्पोविधानकल्पः संहिताविधिरभिचारक रामः
ल्पः शान्तिकल्पश्चेति।तत्रवेदानामुपवेदाभवन्तिऋग्वेदस्यायुर्वेदउपवेदोयजुर्वेदस्यधनुर्वेदउपवेदः सामवेदस्यार्थ २०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शाखं चैत्यानुगमनयान्यासः स्कंधोयाद्यद्मेवेदाश्चलारस्तेषामेकैकस्यकीदृशंरू . वर्णविधोच्यते। ऋग्वेदः पद्मपत्राक्षः
सुविभक्तग्रीवः कुंचितकेशश्मश्रुः श्वेतवर्णोवर्णेनतुकीर्तितं प्रमाणंतावनिष्टन्वितस्तीः पञ्च। यजुर्वेदः पिङ्गाक्षः रू
शमध्यस्थूलगलकपोलस्ताम्रवर्णः कृष्णवर्णोवाप्रादेशमात्रं षडदीर्घत्वेनसामवेदोनित्यंसग्वीसुयतः शुचिर्वासाः श
मीदान्तोवृद्धच्छरीरः शमीदण्डीकातरनयनआदित्यवर्णोवर्णेननवारत्निमात्रोथर्ववेदस्तीक्ष्णः प्रचण्डः काम
रूपीविश्वात्माविद्धाकर्तांक्षुद्रकर्तास्वशाखाध्यायीप्राज्ञश्चमहानीलोत्पलवर्णोवर्णेनदशारत्निमात्रंऋग्वेदस्यात्रेय
सगोत्रंसोमदैवत्यंगायत्रंछन्दोयजुर्वेदस्यकाश्यपसगोत्रमिंद्रदैवत्यंत्रिष्टुप्छन्दः। सामवेदस्यभारद्वाजसगोत्रं
रुद्रदैवत्यंजगतीछन्दोथर्ववेदस्य॥ वैतानसगोत्रंब्रह्मदैवत्यमनुष्टुप्छन्दः॥ यद्मेवेदानानानामरूपगोत्रंप्रमाणं
छंन्दोदैवतंवर्णवर्णयति॥ अविद्योलभतेविद्यांजातिस्मरोपजायते। जन्मजन्मवेदपारगोभवत्यव्रतीव्रतीभवत्यब्रह्म
चारीब्रह्मचारीभवति। नमः शौनकायनमः शौनकाय॥४॥ यदिदंचरणव्यूहंगर्भिणीश्रावयेत्स्त्रियम्॥ पुमांसंजनयेत्पु
त्रमृषिर्वेदपारगैः॥ यदिदंचरणव्यूहंश्राद्धकालेपठेद्द्विजः॥ अक्षय्यंतद्भवेच्छ्राद्धंपितॄंश्चैवोपतिष्ठति। यदिदंचरणव्यू
हंपठेत्सः पङ्क्तिपावनः॥ तारयेत्तुभृतीन्सुजान्पुरुषः सप्तसप्ततिः॥ यदिदंचरणव्यूहंपठेत्पर्वसुपर्वसुविधूतपाप्मास
मि सप्त

र.चू. स्वर्गीब्रह्मभूयायगच्छतिब्रह्मभूयायगच्छति॥राणायनीसात्यमुग्रिदुर्वासाः यभागुरी।गौरुण्डीगौर्गुलवीभगवानौ
२१ पमन्यवः।दारालोगार्ग्यसावर्णीवर्षगण्यश्चेतेदश॥ कुथुमिश्चशालिहोत्रश्चजैमिनिश्चत्रयोदशस्येतेसामगाचार्याः
स्वस्तिंकुर्वन्तुतर्पिताः अथर्ववेदइति॥अथर्ववेदस्यनवभेदाभवन्ति।नचशाखाभवन्तीत्यर्थः।तानाह।पैप्पलादा।स्ता
औतावृह्मदायशशौनकीवेददर्शी॥चरणविधोश्चेति तेषामध्ययनंद्वादशैवसहस्राणि।अत्रवहुवचनंतेवहवः।पत्र्य
वलचसएकएकतेषामध्ययनंसखायोच्यतेद्वादशसहस्राणिमन्त्राणाम्॥कीदृशानि॥पञ्चकल्पानिभवन्तिएकस्मि
न्कल्पेकल्पेपञ्चशतानिमन्त्राणाम्॥कल्पान्याह॥नसत्रकल्पः॥१॥विधानकल्पः॥२॥संहिताविधिकल्पः॥३॥अ
भिचारकल्पः॥४॥शान्तिकल्पः॥५॥इतिपञ्चकल्पाः।तत्रवेदानांचत्वारउपवेदाभवन्ति।यजुर्वेदस्यधनुरायुर्वेदः
चिकित्साशास्त्रम्।ऋग्वेदस्योपवेदः॥१॥धनुर्वेदोयुद्धशास्त्रंयजुर्वेदस्योपवेदः गान्धर्ववेदःसङ्गीतशास्त्रंसामवेद
स्योपवेदः॥३॥सामवेदस्यगान्धर्ववेदउपवेदः ऋग्वेदस्यायुर्वेदउपवेदः अथर्ववेदस्यशास्त्रंचेत्याह अर्थशास्त्रंनीति
शास्त्रंशास्त्रंविश्वकर्मादिशिल्पिशास्त्रं।अथर्ववेदस्योपवेदः॥४॥भगवान्व्यासः स्कंदकुमारोवाइति॥यद्गमेचत्वा राम:
रोवेदाउक्तास्तेषांमध्येएकैकस्यकीदृशंरूपंआकारः।तत्तद्वर्यासितासितादि[illegible]गः विधकः।प्रकारश्चोच्यते॥ऋग्वे २१

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दस्वरूपमाह॥ ऋग्वेदः पद्मपत्रायताक्षः॥ पद्मपत्रंकमलदलन्तद्वदक्षिणी नेत्रेयस्यसः॥ सुविभक्तग्रीवः
विभक्तारेखात्रयांकिताग्रीवायस्यसः किंचित्केशश्मश्रुः कुंचिताः वलीमन्तः केशाः शिरसिजाः श्मश्रूणिमुर
रोमाणियस्यसश्वेतवर्णो वर्णेनतुकःकुवर्णोनश्वेतवर्याः श्वेतोवर्णोयस्यसः कीर्तितंप्रमाणंन्तवत्तिशन्वितस्तीःप
ञ्चतावत्साकल्येनपञ्चवितस्तीन्भवन्तिनिहनतत्प्रमाणंऋग्वेदस्यकीर्तितं। उक्तम्॥ वितस्तिशब्दोवितस्तिद्वाद
शाङ्गुलः सार्द्धहस्तद्वयप्रमाणमित्यर्थः॥ यजुर्वेदस्वरूपमाह॥ यजुर्वेदः पिङ्गोपीतेअक्षिणीयस्यसः॥ कृशमध्य
कृशमध्येकटिप्रदेशोयस्यसः॥ स्थूलगलकपोलः॥ स्थूलौगलकपोलौयस्यसः ताम्रपीतवर्णः॥ ताम्रपीतस्ताम्र
वदाचरितोरक्तोवर्णोयस्यसः॥ यद्वाकृष्णवर्णः॥ कृष्णवर्णोयस्यसः॥ प्रादेशमात्रंषट्दीर्घत्वेनेदीर्घत्वेनोच्चत्वेन
षट्प्रादेशमात्रः॥ षट्प्रादेशप्रमाणंयस्यस॥ प्रमाणेमात्रस्येत्यर्थः॥ प्रादेशस्तुप्रदेशस्तुप्रदेशिन्येत्यभिधानोक्तेः॥
अङ्गुष्ठप्रदेशिन्योर्विहितत्वात्॥ प्रमाणप्रादेशोदशाङ्गुलः॥ तादृशाः षट्प्रादेशाः प्रमाणम्॥ षष्ट्याङ्गुलसार्द्धद्व
यहस्तमित्यर्थः॥ २॥ सामवेदस्वरूपमाह॥ साम्वेदोनित्यंस्रग्वी॥ स्रजोअस्यसन्तीनिस्रग्वी॥ अस्मायामेधास्रजा॥
विनि॥ नित्यंपुष्पमालाधारी॥ समयतनियमवान्सुप्रयतः शुचिः पवित्रः शुचिर्वासः॥ शुनिमुद्वासोब्रह्म

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुद्धवस्त्रधारी॥शमीशमः॥शांतिरस्यास्तीति।र्मांशान्तमनाः।दांतः।नियतबाह्येंद्रियः॥वृहच्छरीरः वृहत्महत्
शरीरंयस्यसः॥सामीदण्डी॥शमीनरोर्दण्डेयस्यसः॥क्रांतरनयनईसतहूनयनेनेत्रेयस्यसः।वर्णेनआदित्यव
र्णः।आदित्यस्यभानोवर्णइववर्णोयस्यसः॥नवारत्निमात्रः॥नवअरत्निप्रमाणंयस्यसः सार्द्धचतुष्टयहस्तदीर्घ
इत्यर्थः॥अथर्ववेदस्वरूपमाह॥अथर्ववेदः॥चपुनः॥तीक्ष्णः॥उग्रः॥प्रचण्डः॥क्रोधीरकामरूपो।कामेनरू
पाणियस्यसः॥स्वेच्छारूपधारी॥विश्वात्माविश्वस्यात्माविश्वस्यकर्तुः॥स्रष्टाचउपनिषद्बाहुल्यात्॥क्षुद्रकर्माक्षु
द्राणिकर्माणियस्यसः॥आभिचारकृत्याप्रयोजकमन्त्रबाहुल्यात् स्वशास्त्राध्यायी॥अथर्वणिविशेषः प्राज्ञश्चमहा
नीलोत्पलवर्णेनउत्पलंश्यामकमलंतथाइववर्णोयस्यश्यामसुन्दरः॥दशारत्निमात्रः दशअरत्नयः प्रमाणंयस्य
पञ्चहस्तप्रमाणइत्यर्थः॥अथवेदानांगोत्रदेवतानांछन्दांस्याह।ऋग्वेदस्यात्रेयसगोत्रम्॥आत्रेयाः सगोत्राः सम
गोत्रायस्यतत्॥अत्रिगोत्रऋग्वेदइत्यर्थः॥सोमदैवतं॥सोमदैवतंयस्यतत्॥गायत्रीछन्दः गायत्रीछन्दोयस्य
त्॥एवमग्रेपिव्याख्यातव्यम्॥अथयजुर्वेदस्वरूपं॥काश्यपगोत्रंइन्द्रदैवत्यंत्रिष्टुपछन्दः॥कश्यपगोत्रंइन्द्रदैव
त्यंत्रिष्टुपछन्दस्कोयजुर्वेदइत्यर्थः॥अथसामवेदस्वरूपम्॥भरद्वाजगोत्रंरुद्रदैवत्यंजगतीछन्दः॥अथर्ववेद



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

म्यवैनानगोत्रब्रह्मादैवत्यंअनुष्टुपछन्दः॥४॥अथचतुर्वेदस्यफलस्तुतिमाहयइदमितिः यःपुमान् इदंवेदानां
नामरूपगोत्रंप्रमाणंछन्दोदैवत्यवर्णंवर्णयति॥नामादीनांद्वन्द्वैकवद्भावः॥नामऋग्वेदादि॥१॥रूपंपद्मपत्रा
सादिर॥गोत्रंआत्रेयादि॥३॥प्रमाणंपञ्चवितस्त्यादि॥४॥छन्दोगायत्र्यादि॥५॥दैवतंसोमादि॥६॥वर्णश्वेतादिच
॥७॥इत्यादियोजानातिसभविद्योविद्याहीनःसन्विद्यालभतेप्राप्नोति॥जातिस्मरोथजायते।अथजन्मान्तरेजाति
र्जायतेपूर्वजातिंस्मरति॥जन्मनिजन्मनिप्रतिजन्मवेदपारगोवेदपाठीभवति।अव्रतीव्रतीभवति अव्रतीव्रत
हीनोपिव्रतवान्भवति॥व्रतफलमाप्नोति॥अब्रह्मचारीब्रह्मचारीभवति॥ब्रह्मचर्यहीनोपिब्रह्मचर्यफलंप्राप्नोती
त्यर्थः॥शौनकाचार्यायनमः॥पदावृतिः ग्रन्थसमाप्त्यर्थः॥श्रवणपठनफलमाह॥यइदमिति॥यःपुमान्इदंचरणा
व्यूहंगर्भिणींस्त्रियंश्रावयेत्सास्त्रीपुंमांसंपुरुषलक्षणोपेतंपुत्रंजनयेत्॥यइदंचरणव्यूहंश्राद्धकालेपठेत्तत्श्रा
द्धंपितॄन्प्राप्नोतितर्पयतीत्यर्थः॥यइदंचरणव्यूहंप्रत्यहंपठेत्सपङ्क्तिपावनोभवति॥यस्यांद्विजाःपङ्क्तावास्तेतां
सर्वांपुनातीत्यर्थः॥सचपुत्रान्प्रभृतीन्पुत्रादिकान्सप्तचपुनःसप्तवारान्जाद्यादीन्पित्रादींश्चआत्मानंचैवयं
दशपुरुषान्तारयति॥यइदंनित्यशःपर्वसुपर्वसुअष्टमीभूतदर्शपौर्णमासीसंक्रान्तिषुचपठतिसधूतपाप्माधूतो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दूरीकृतोपाप्मायापंपेयेनसएवशुचिःपवित्रःसन्ब्रह्मभूयायब्रह्मभावायगच्छति।कर्मणिचेतिचतुर्थी।ब्रह्मभाव
माप्नोतीत्यर्थः॥४॥ इतिचरणव्यूहभाष्येचतुर्थःखण्डः॥त्रिदशांगधरामितेगतेब्देमधुमासेदशमीतिथौ
सुधांशौ॥महिदासबुधोपरोपकृत्यैचरणव्यूहमिदंव्यकारिकाश्याम॥१॥ विद्वद्भिःप्रार्थितेनायंमहिदासद्वि
जन्मना॥चरणव्यूहवृत्तिश्चविहितोहमयाकृता॥२॥ ॥ इतिचरणव्यूहःसमाप्तः ॥ ॥ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

29

10139

# ॥श्रीदशाश्रुतस्कन्ध-मूल-निर्युक्ति-चूर्णिः॥

For Private and Personal Use Only